=तयोरुपमायामिति· विरोधितेनोपमायां विरोधितायामित्यर्थः· तथा च प्रकरणेन सहकारितया [illegible] एतेन [illegible] [redacted] [illegible]

प्रदीपः

१९

सस्यप्रतियोगिपूर्वकत्वात्· साहचर्यं सहचरता तेन यथा· रामलक्ष्मणाविति रामपदस्य लक्ष्मणसाहचर्येण दाशरथौ· विरोधः सहानवस्थानं व
ध्यघातकभावश्च तेन यथा· छायातपाविति छायापदस्यातपाभावे· विरोधिनोः कयोश्चित्तत्वोपमायां रामार्जुनगतिस्तयोरित्यत्र रा
मार्जुनपदयोर्भार्गवकार्तवीर्ययोः। अर्थः प्रयोजनं तेन यथा· स्थाणुं भज भवच्छिदे इत्यत्र भवच्छेदनरूपप्रयोजनवशात् स्थाणुशब्दस्य ह
रे· प्रकरणं वक्तृश्रोतृबुद्धिस्थता तेन यथा· सर्वं जानाति देव इत्यत्र देवशब्दस्य राजनि· यत्तु युष्मदर्थ इति व्याख्यानं तस्यापि प्रकृते
राजादावित्यर्थः किं वा संबोध्ये राजादावित्यर्थः। संबोध्यस्यैव युष्मदर्थत्वात्· लिंगं संयोगातिरिक्तसंबंधेन परपक्षव्यावर्तको धर्मः। तेन य
था· कुपितो मकरध्वज इत्यत्र मकराकारध्वजसमुद्रसाधारणेन समवाय[redacted]संबंधवता कोपेन मकरध्वजशब्दस्य कामे· यत्तु लिं
गं चिह्नमिति· तन्न· कोपस्य कामचिह्नत्वाभावात् सशंखचक्र इत्यत्रातिव्याप्तिप्रसंगाच्च· शब्दस्यान्यस्य सन्निधिः नियतार्थकशब्दांतर
सामानाधिकरण्यं अतो न वच्छिदे इत्यादावप्रसंगः। न च सशंखचक्रो हरिरित्यत्राव्याप्तिः शंखचक्रसामानाधिकरण्याभावात्· यद्वा· हरौ शं शिवः

=प्रयोजनमिति· भजनस्य साध्यमित्यर्थः।६ =संयोगातिरिक्ते ति· [illegible] ।। साधारणधर्मस्य चिह्नत्वात् [illegible] आप्तिरिति [illegible] [illegible] देशतेन मभिधेयकामलिंगताया आश्रयणीयत्वेन शंखचक्र [illegible]

१९

खचक्रे इति संयोगो हरिहरणत्वात्त्वं · तेन यथा · देवस्त्रिपुरारातेरित्यत्र त्रिपुरारातिशब्दसामानाधिकरण्याद्देव शब्दस्य शंभुरूपेऽर्थे · अन्य
स्य देवशब्दार्थस्य राज्ञस्त्रिपुरारातित्वाभावात् · यत्तु देवतान्तरस्यान्यथाभावाच्च ओशक्तिनियमनमिति · तन्न युक्तं · देवतान्तरे देवशब्द
स्य शक्तिनैव तदभावादुदाहरणसामञ्जस्यापत्तेः · सामर्थ्यं कारणत्वं तेन यथा · [redacted] मधुना मत्तः कोकिल इति · अत्र मधुश
ब्दस्य वसन्ते · अन्यस्य मधुशब्दार्थस्य कोकिलमादना सामर्थ्यात् · औचिती अर्हता · तया यथा · पातु वो दयितामुखमिति · अत्रौचित्या कण्ठि
तमनोरथसाधनौचित्येन मुखशब्दस्य सांमुख्येन तूपायादेः · यद्यप्यत्रापि सामर्थ्यं संभवत्येव तथापि मधुनेत्यत्र तन्नीयये वलहो
धाभावेप्यौचितीमात्रज्ञानादेवशक्तिनियमनमसंकीर्णमिति · देशेन यथा · भात्यत्र परमेश्वर इत्यत्र [redacted] अत्रेति राजधानीरूपा
द्देशात्परमेश्वरपदस्य राजनि · कालेन यथा · चित्रभानुर्विभातीत्यत्र चित्रभानुपदस्य दिवा दिवाकरे · रजन्यामग्नौ प्रतीतेः · व
क्ति लिंगं पुंस्त्वादि · तया यथा · मित्रं भातीत्यत्र नपुंसकरूपाल्लिंगान्मित्रपदस्य सुहृदि · मित्रो भातीत्यत्र पुल्लिंगात्सूर्ये · स्वरस्तूद

॥ मैथिलि· काव्येक शरणादित्वन्नाद्यर्थभेदेस्तनास्त विषयेर्ष्व गरुडध्वजादितिकाव्येन वर्षैकमुनिदाभीमत इति भावः ॥२॥

प्रदीपः

२०

20

नादिर्वै देवाकुल्येनार्थप्रतीतिकृद्भवले· यथेंद्रशत्रोर्वर्धस्वेति· अत्रेंद्रशत्रोरित्यस्यांतोदात्तत्वे षष्ठीतत्पुरुषव्यक्ताविंद्रस्य शातनकर्तृत्वं लभ्यते
पूर्वपदांतोदात्तत्वे च इंद्रः शातयिता यस्येति बहुव्रीहिलाभादिंद्रस्य शातनकर्मत्वं लभ्यते· काव्ये तु नैवं वाकुल्यं· ननु दृष्टे प्रसीदेत्यादौ
स्वरेणार्थसंबोधनं प्रकाश्यते तेन चार्थविशेषे अभिधानियम्यते न तु साक्षात्स्वरेणैव· काकुस्थले तु न नानार्थाभिधाननियमनं किंतु पदार्थ
स्यैव व्यंजनं· यद्वा स्वरशब्दे नोदात्तादित्रयं विवक्षितं· अतः काव्ये स्वरस्याभिधानियामकत्वं नास्त्येवेति व्यर्थं वाकुल्येनेति विशेषण
मिति· मेवं सुधाकरसुहृदंकैश्छवि: पंकजवैरिणी यादाविंद्रशत्रुरिति न्यायेनाभिधानियमनस्य काव्ये दुर्वारत्वात्· स्वरादय इत्या
दिग्रहणाद्भिनयापदेशग्रहणं· अन्ये चोक्तांतर्भूताः· अभिनयश्च साक्षादिवार्थाकारादिप्रदर्शिका हस्तादिक्रिया· तयायथा· एद्दह
मेत्तत्थणिआ एद्दहमेत्तेहिं अच्छिवत्तेहिं· एद्दहमेत्तावत्थाएद्दहमेत्तेहिं दिअहेहिं· अत्र विकसित मुकुलिताभिनयविशेषसाहित्येन स्त
नस्यपीनत्वमुकुलितत्वाद्यर्थविशेषेऽभिधानियम्यते· एवं शेषपद्येऽपि· अपदेशोऽभिमतानिर्देशः तेन यथा· इतः स देशः· प्राणश्री

शिवः

॥ र्णादित्यादि॥ स्वरविशेषोऽर्थविशेषाधिकावगमाय वेदलोके विषयमस्ते नंत्रीकावाक्यावैदिकस्थलेषु काकौ विकल्पतेऽपि हेतुर्व्यवस्थितमाधिकास्थरूपेणाकौ भेदपरस्पराप्यान्वयं॥ ॥ ननु श्रीनामातमाविसंयोगपूर्वभावस्य तामन्वया
॥ तद्विपरीतमन्यजनकभावस्य साम्यमनुभयादि सत्राणाभिनयभावस्य वाच्यमभिधाभिनामकत्वात् पदानामेव तदुक्तमत आहान्ये चेति· उक्तसाहचर्यादयो भावसर्व॥ साहचर्यं च सर्वत्रोदितिसंयोगमन्संबाधेत
॥ रूपं· न चैवं समशब्दव नगादिसत्रतत्रापतेः॥ धंयपदे संयोगे च योगेन... साहचर्यसमस्त्रीत्वपरिभाषात्· विना स्वानुसारं चर्येऽर्थगमार्थ

२०

=अपूरयोर्भिन्नतानिर्देशः स्यच हरमोत्सानिषेधः अर्थाकावमदमर्थकत्सुमावान्नाम्यम [redacted] भिनयः ११ = नवीचेति भक्तिप्रवत्तिविलोकनप्रागल्भिनी लतादि कलनं पुष्पोद्गमः रामस्तेयोजतुकाष्ठन्याय्येनयाद्ययोः संश्लेषणान्नत्र रूपोदयिमाधान्यवि
=मानोपमेयभावकल्पनमिति प्रेक्षणार्थतात्पर्यपर्यगतेसाप्यसंबद्धार्थबोधनामोणाद्युपमानत्वेनसमस्तार्थविशेषणत्वमिति पमानोपमेयत्वकल्पनामीमितिदः ।। योमहासमरगोत्राणामित्याद्यनंगभीवरलेक रूपगतकवाचयन्या

नैतत् एवार्हति क्षयं· विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतं· अत्रापदेशेन दंशशब्दस्याभिधावक्तरि नियम्यते· इत्थं संयोगादिनार्थान्तराभिधायकत्वे निवारितेऽपि यदनेकार्थशब्देन कस्यचिदर्थान्तरस्य प्रतिपादनं तत्र नाभिधा शब्दस्य व्यापारः नियमनात्तस्याः ।। नापि लक्षणा मुख्यार्थबाधादिविरहात्· किं तु अनंतं व्यंजनमेव व्यापारः ।। यथा· भद्रात्मनो दुरधिरोहतनोर्विशालवंशोन्नतेः कृतशिलीमुखसंग्रहस्य· अस्यानुपप्लवगतेः परवारणस्य दानांबुसेकसुभगः सततं करोऽभूत्· अत्र प्रकरणेन भद्रात्मन इत्यादिपदानां राजनि तदन्वययोग्ये चार्थेऽभिधा नियंत्रणेऽपि गजस्य तदन्वययोग्यस्य चार्थस्य व्यंजनयैव प्रतीतिः ।। ननूपमानोपमेयभावकल्पनाविरहाच्छब्दश्लेषतो भेदे योऽसकृत्परगोत्राणामित्याद्यर्थश्लेषवत्कुतोऽस्य भेदः ।। अर्थश्लेषे चोभयत्र शक्तिरेव· न व्यंजनेति चेत्· उच्यते· यत्रानयोरर्थयोस्तात्पर्यं स श्लेषः ।। यत्र त्वेकस्मिन्नेव तत्त्वं सामर्थ्यात्तु द्वितीयार्थप्रतीतिः सा व्यंजनेति· एवं व्यंजनां निरूप्य तया शब्दं लक्षयति· तद्युक्तो व्यंजकः शब्दः ।। अंजनमिति प्रस्तुतेऽपि अर्थंशसातच्छब्देन व्यंजनं परामृश्यते· तेन व्यंजनयुक्तो व्यंजक इति संपद्यते· अन्यथा अंजनयुक्तोंजक इति स्यात्· तदेतदुक्तं· अंजनयुक्तो व्यंज

=पतोऽन्यो रितिः अन्यत्वत्राभिधानियामकाभावादुभयत्र तन्त्रभावाद्वाच्ययोरुभयत्र तात्पर्यं स श्लेषस्य विषयो न व्यंजनायाः यत्र तु अभिधानियामकमनेकार्थत्वात्र परार्थप्रतीतिर्व्यंजनयैवेति तत्राभिधामूलध्वनेर्विषयः स प्रसिद्धः=

नयुक्तः।ननूक्तस्थले अर्थस्याव्यंजकत्वे कथं शब्दार्थयुगलरूपस्य काव्यस्य ध्वनित्वं स्यादित्यत आह·यत्त्वोर्थांतरयुक्ततया·अर्थोपि व्यंजकस्तत्र
सहकारितया मतः।स इति शब्दः।तथा व्यंजकः॥ ॥ इति श्रीमहामहोपाध्यायश्रीगोविंदकृते काव्यप्रदीपे काव्यशरीरभूतशब्दार्थविवे
चनो नाम द्वितीय उल्लासः॥ ॥ एवं शब्दे निरूपिते उपोद्घातेन शब्दव्यंजनायां निरूपितायां प्रसंगे नार्थव्यंजना निरूपणीया·तत्रैतदाधा
रे तु शब्दे निरूपितेऽवसरोयमर्थनिरूपणस्य·किंच·अर्थधर्मिणि निरूपिते तद्धर्मो व्यंजना सुनिरूपा भवति·न तु तस्मिन्ननाहृ
तस्य व्यंजना निरूपणमिति तं तूद्देनां शंकामुपनिनीषन्नुक्तं स्मारयति·अर्थाः प्रोक्ताः पुरा तेषां·अर्थाः वाच्यलक्ष्यव्यंग्याः।अर्थस्य सन्निकृ
ष्टतरत्वेपि तेषामित्यनेन न योग्यतया वाचकादयः शब्दाः परामृश्यंते·शिष्यावधानाय प्रतिज्ञानीते·अर्थव्यंजकतोच्यते·ननु सर्वे
षामित्यादिना पूर्वमर्थानां व्यंजकता प्रोक्तैव तस्याः कीदृशी सेत्याकांक्षायामाह·वक्तृबोद्धव्यकाकूनां वाक्यवाच्यान्यसन्निधेः।प्र
स्तावदेशकालादेर्वैशिष्ट्यात्प्रतिभाजुषां·योर्थस्यान्यार्थधीहेतुर्व्यापारो व्यक्तिरेव सा·बोद्धव्यः प्रतिपादनीयो जनः।अंतर्भावितण्यर्थ

त्वात्‌ः अतो न वाच्येनाभेदः। काकुः शोकभीत्यादिभिर्ध्वनिविकारः। वाक्यवाच्याभ्यां सहितोऽन्यसन्निधिर्वाक्यवाच्यान्यसन्निधिः अतो न द्वंद्वैकवद्भावेन नपुंसक
त्वप्रसंगः। प्रस्तावः प्रकरणं· वैशिष्ट्यं वैलक्षण्यं· तच्च वक्त्रादिषु प्रत्येकमभिसंबध्यते· अन्योऽर्थो वाच्यलक्ष्यव्यतिरिक्तः। व्यक्तिः व्यंजना। करणव्यु
त्पत्तेः। अर्थस्य त्रिविधस्यापि· ननु कस्यचिदेव· प्रतिभाजुषामित्यनेन नवनवोन्मेषशालिनी प्रज्ञा प्रतिभा या वासनेत्युच्यते· तस्यां सत्यामेव वक्त्र
वैशिष्ट्यादिसत्वेपि व्यंग्यप्रतीतिरिति प्रतिपादितं· अत एव वैयाकरणादीनां न तथा रसप्रतीतिः। तथा चोक्तं· सवासनानां नाट्यादौ रसस्या
नुभवो भवेत्‌· निर्वासनास्तु रंगांतर्वेश्मकुड्याश्मसन्निभाः इति· यथाक्रममुदाहरणानि· अइ पिहुलं जलकुंभं घेत्तूण समागदह्मि सहि
तुरिअं· समसेअसलिलणीसासणीसहा वीसमामि खणं· अत्र वक्त्री कामिनी· तस्याः दुःशीलत्वरूपवैशिष्ट्यं विजानतां चौर्यरतगोपनव्य
क्तीभवति· ओल्लिद्दं दोवल्लं चिंता अलसत्तणं सणीससिअं· मह मंदभाइणीए केरं सहि तुह वि अहह परिहवइ· अत्र दूती प्रतिपाद्या· तस्या
अन्यदापि दृष्टदुश्चेष्टाया वैशिष्ट्येन तस्याः कामुकोपभोगो व्यज्यते· अत्रान्यदीयमुन्निद्रतादिकमन्यत्र बाधितमिति तत्सहचरणमुन्निद्र

=मंदभाग्यविनेरोतं कृतेनातेन परिभवसेवमकार्यपित्र्यगमनागमनादिव्यापारेण लाभमपीत्यर्थः। अत एव त्वस्यमंदभाग्यतोक्तिः। एवं च सर्व्यानायिकासंबंधोन्निद्रादिसंबंधस्य वाक्यप्रतिपाद्यत्वाभावात्तथावाच्यानेकांचिदमुकमिसा

=इत्येनेति· अनौचित्यरूपेण· वाच्यस्येति· भ्रातरित्येवं जनजननरूपस्य कुरुषु तदर्जानरूपस्य चेत्यर्थः। श्रंगमनेति· अनौचित्यरूपव्यंग्यार्थोपस्कृतवाच्यार्थस्यैव भीमक्रोधप्रकर्षकत्वादिति भावः। उक्तव्यंग्येति· तस्यैवेत्यर्थः। अनौचित्यकारिणि क्रोध=

=प्रकर्षस्यानुगुणविकल्पेनतत्सूचकत्वाद्ध्वनिर्वाच्यान्तिर्व्यंग्य इति ध्वनित्वमेवेति भावः। प्रश्नकाकापीति· तन्मात्रनिष्ठा प्रश्नभंजिका काकुरित्यर्थः। अनौचित्यादिव्यंजिका काकुस्तु खेदं स्विन्नेमयि सज्जतिनाद्यापि कुरुषु इति समुदायनिष्ठेति

प्रदीपः

ध्वन्यर्थं क्रमिति ध्वनित्वप्रयोजिकेत्यर्थः =४

२२ तादृक्केवलस्य नइति केचित्· तद्बोधात् सख्यास्तदीयोन्निद्रतान्वयस्यावाच्यार्थतायाः· तथाह्यत्तिष्ठान्नपसदसि पांचालतनयां वने व्याधैः
साधं सुचिरमुषितं वल्कलधरैः। विराटस्यावासे स्थितमनुचितारम्भनिभृतं गुरुः खेदं स्विन्ने मयि भजति नाद्यापि कुरुषु· खेदो मात्सर्यं
अत्र खेदं स्विन्ने मयि भजति नाद्यापि कुरुषु इति काकोर्वैशिष्ट्यान्मयि न योग्यं कुरुषु योग्यं मात्सर्यमिति व्यज्यते· नन्वत्रोक्तेन काकुव्यंग्येन वाच्यस्य
सिद्धिः श्रेणनलनिष्पत्तिः क्रियते· तथा चापरांगतया व्यंग्यं गुणीभूतमतो न ध्वन्यंगं काकुरिति चेत्· उक्तव्यंग्यस्य क्रोधप्रकर्षपर्यवस
न्नतया वाच्यस्यैव तदंगत्वात्· तदेतदुक्तं· न च वाच्यसिद्ध्यंगमत्र काकुरिति गुणीभूतव्यंग्यत्वशंकापीति· न यापिका काक्षिप्तव्यंग्यरूपगु
णीभूतव्यंग्यमनेदत्याकथं नेयेति चेन्न· अत्र नेति प्रश्नकाकापि वाच्यार्थप्रतीतिपर्यवसानात्· यां काकुं विना वाच्यार्थ एव नोपपद्यते त
येवाक्षिप्तस्य गुणीभावात्· यथा मथ्नामि कौरवशतं समरे न कोपाद्दुःशासनस्य रुधिरं न पिबाम्युरस्तः इत्यादौ भीमसेनादौ नाद्येऽनवक्तरि
ति· तदुक्तं· प्रश्नमात्रेणापि काकोर्विश्रान्तेः। अन्ये तु कुरुषु न भजतीति तन्त्काकुः किमर्था तत्तः प्रश्नरूपः किमर्थ एव हठाक्षिप्त इति तस्यैव

क्रोधप्रकर्षकतया रहान्ते [illegible] व्यंग्य मप्रधानं [illegible] वाच्य [illegible] नप्रकर्षे [illegible] येसहाय [illegible] भावः

=यां काकुमिति· एवं च न अत्र निष्काकाक्षिप्तस्य प्रश्नस्य वाच्यसिद्ध्यंगता इत्येवं समुत्पन्नकाकुस्तु न ध्वनित्वविरोधिनी गुणीभावइति भावः। अन्ये त्विति· सर्वथापि नव्यात्र एव काकुर्न विशिष्टेत्यन्ये इत्यर्थः। तन्त्रकाकेत्यस=२२

=तदेव स्फुटयति· सुजनं भ्रातरं खातद्राक्षप्यापिनिष्प्रा गुणिगुरुः खिन्ने मयि खेदं भजति निखिल कालिकुल कुरुषु नेत्येवं व्यंग्यार्थप्रतीतेर्मवप्रश्नव्यंजिका काकुः साकार्यवाच्यार्थसिद्ध्यंगतया योग्यत्वादिति ध्वन्य

=इत्येवं कानतिशयोक्तिविषय
=इदं खेदं स्विन्ने भ्रातरि
=इत्येतदिति· अपरशंगवाच्यत्वामिति
=वाच्यनिरूपणपूर्वमिति· काकाभाव
=यद्वात्रदित्यावत्तमानयनक्षमा
=भीत्यागित्यन्यत्र प्राप्तत्वाद्गुणी
=भूतव्यंग्यत्वाकात्पिवाच्य
=तैनभावात्मानमाह· यथापीति·४·

शिवः

=क्रमेणण्यीति॰स्तम्भरूपयंण्यद्यन्देसर्थः॥काकेति॰काकुभंग्येनेत्यर्थः॥१= दिंवंविहायमतिथिंभ्रस्यांनान्तन्द्रयादिनिवोध्यं॰मदंममममदिरीनावाडकिंरनारवमववीमिद्युक्तमिसाद्युः॥१=यथोक्तविशेषणेनेति॰मेषामयेस्तनीसादिविशेषणेनयासुमंयंभदुल्यकालंकामिनीवीक्रामयीतादर्शनां

गुणीभावोन्याय्यः॥ननुकेमेणापिकाक्वागुणीभूतव्यंग्यो भवति॰अतएववृगुणीभूतविभागेकाकाक्षिप्तमितिहत्वार्यगर्भाक्षिप्तपदप्रयोग इतितात्पर्यमा
कुः॥तइआमहगंडत्थव्नणिम्मिअंदिठ्ठिंएणेसिअलन्तो॰एन्हिंसवेअअहंतेअकवोलाणसाद्दि ठ्ठी॰वाक्यमनेकंपदं॰तेनात्रनदेदानींपदात्मकवाक्य
वैशिष्ट्यामसखीकपोलप्रतिबिंबितांपश्यनस्तेदृश [redacted] न्यादृशीचलितायांतुतस्यामन्यादृशीसतोप्रच्छन्नकामुकत्वंतवेतिव्यज्यते॰
उद्देशोयंसरसकदलीश्रेणिशोभातिशायीकुंजोत्कर्षाकुरितरमणीविभ्रमोनर्मदायाः॥किंचैतस्मिन्सुरतसुहृदस्तान्विनेवांतिवातायेषामग्रे
सरतिकलितांकांडकोपोमनोभूः॥अत्रनर्मदोद्देशरूपस्यतद्विशेषणीभूतयातकुंजादिरूपस्यचवाच्यस्यर्यथोक्तविशेषणस्यवैशिष्ट्यात्सु
रतार्थंप्रविशेतिव्यज्यते॰णोल्लेइअणुल्लमणाअत्तामंघरन्नरम्मिसअलम्मि॰खणमेत्तंजइसंझाइहोइणवहोइवीसामो॰अन्यसान्नि
धिःसन्निहितोन्यः॥तेनात्रप्रतिवेशिनीप्रतिप्रवर्तितेवाक्येप्रच्छन्नरूपस्यान्यस्यसान्निध्येवैशिष्ट्यात्सन्निहितंप्रतिसंध्यासंकेतसमय
इतिव्यज्यते॰सुव्वइसमागमिस्ससितुज्झपिओअज्जपहरमेत्तेण॰एमेअकिंतिचिठ्ठसितासहिसज्जेसुकरणिज्जं॰अत्रप्रकरणस्यप्र

=सन्निधिर्वैशिष्ट्यमसान्निहितत्वमितारात्सान्निहितात्रन्निमन्निधिर्वैशिष्ट्यंपरंपर्यायासमितारात्यः॥अमारति॰वक्तमगोपाधाभंतामितलइत्यर्थः॥१=प्रज्यतइति॰सन्निहितंप्रतियत्संकेतसमयबोधनंतत्सामाजिकेषुभज्यतइत्यर्थः॥एवमन्यत्रापिबोध्यं॥१=

दृशोकालार्थ॥१=

=सर्वाभ्यरकोंशालिरनामर्थ्यकवकः।२=

प्रदीपः

२३ स्तायस्याभिसारसंबंधित्वरूपवैशिष्ट्याद्युपपत्तिंप्रत्यभिसर्त्तुंनयोग्यमितिव्यज्यते॰अन्यत्रप्ययंकुसुमावचायंकुरुध्वमत्रास्मिकरोमिसख्यः।नाहं
२३ विदूरेन्नमितुंसमर्थाप्रसीदतायंरचितोंजलिर्वः।अत्रदेशस्यातिविविक्ततारूपवैशिष्ट्यादिसहितात्सख्याप्रच्छन्नकामुकोयुष्माभिःप्रेष्य
परः इतिप्रियसखीःप्रतिव्यज्यते॰गुरुअणपिअवसेकिंणमितुरुमंरत्ताइएीअहअं॰अज्ञपवासंवच्चसिवच्चसअंजेवसुणसिकर
णिज्जं॰अत्राद्यपदप्रतिपाद्यमधुसमयवैशिष्ट्याद्धकुर॰वस्थाविशेषसहितादिदानीपदिज्ञजसितदहअहंतावत्लज्जीवामितवकु
नज्जानामिगतिमितिप्रियंप्रत्यनुरक्तयाव्यज्यते॰आदियहणाच्चेष्टालीलादेः।तत्रचेष्टायायथा॰द्वारेपांतनिरंतरेमयितयासौं
दर्यसारश्रियाप्रोल्लास्योरुयुगंपरस्परसमासक्तंसमासादितं॰आनीतंपुरतःशिरोंशुकमधःक्षिप्तेचलेलोचनेवाचस्तच्चनि
वारितंप्रसरितंसंकोचितेदोर्लते॰अत्रोरुसमासंगादिचेष्टावैशिष्ट्यात्प्रच्छन्नकामुकविषयआकूतविशेषोव्यज्यते॰तत्रप्रथमा
र्देस्पृष्टकमालिंगनं॰शिरोंशुकंपुरत्नआनीमित्यनेनगूढमागच्छेरिति॰अधःक्षिप्तेचलेलोचनेवाचस्तच्चनिवारितंप्रसरणमि शिवः
२३

=गितंतुलन्यायेनप्रथमालिंगनमेतत्॰वक्ष्यमाणंतुनीवक्षीमन्यायादपरमितिभेदः।१२

=यथात्रसूर्यभिसुसारणेदेयावैधीयंवन्तुवैधियंच२= भिन्नार्थतालिंगनेनानिःस्पंदत्वापनंआरभिसत्रायनक्रियानुपादानात्‌नातिशानादिसंभवन्तीति·

सेताभ्यांसूर्यास्तमयेकोलाहलरहितेकालेसमागंतव्यमिति· संकोचितेदोर्लतेइत्यनेननपारितोपिकृमालिंगनंकरोमीतिव्यज्यते· यद्यप्येकत्रै
वोदाहरणेभेदांतराण्यपिसंभवंतिनदेवोदाहरणांतरंसंभवतितथापिनिःसंदेहत्वसत्त्वयेप्राभावसरतयापुनःपुनरुदाह्रिय
ते· वक्तृबोद्धव्यादीनांप्रत्येकमेवनव्यंजकत्वंकिंतुमिलितानामपीतिद्रष्टव्यं·तत्रक्रमोव्यंजकत्वंयथा· अत्ताएत्थणिमज्ज
इएत्थअहंदिअसेअंपलोएहि·मापहिअरत्तिअंधअसज्जाएमहणिमज्जसिहि·नन्वर्थमात्रव्यंजकत्वेशब्दार्थयुगलकाव्यस्य
व्यंजकत्वंनसिद्धमित्तआह·शब्दप्रमाणवेद्योर्थोव्यनक्त्यर्थांतरंयतः। अर्थस्यव्यंजकत्वेतच्छब्दस्यसहकारिता·॥ इतिश्रीमहाम
होपाध्यायश्रीगोविंदकृतेकाव्यप्रदीपेअर्थव्यंजकतानिर्णयस्तृतीयउल्लासः॥३॥ यद्यपिकाव्यलक्षणंविभागंचाभिधाय
लक्षणपदार्थेषुविवेचनीयेषुविशेष्यपदस्यार्थःशब्दार्थौविचारितौ·इदानींविशेषणपदार्थानांदोषगुणालंकाराणांनिरूपणमु
चितंनतुकाव्यभेदस्यध्वन्यादेर्भेदानां·तथापिध्वन्यादेर्भेदेषुज्ञातेषुदोषादीनांहेयोपादेयतयोरवगमोभवति·तयोर्विशेषनिष्ठ

=मित्यमभिमन्त्रिरूपणं विनादोषादिनिरूपणं न संभवतीति एवभेदानिरूपणीयाः सन्तआह-प्रसंगादिति॥ ननुआसादेवेषवाच्यासारविवक्षितवाच्यत्वस्यासंगतिनिरस्तवाच्यार्थान्तरसंक्रमितवाच्योत्पत्याधानएवेपिवाच्यस्वरूपं तदेणलक्ष्यत्वसत्वात्स्यार्थान्तरसं=

लात्‌-यथाश्रुतिकटुत्वं दोषो ध्वनिविशेषे श्रृंगारादिध्वनौ हेयो रौद्रादिरसध्वनौ चित्रभेदे चादेय एव-माधुर्यादिगुणः श्रृंगारादिध्वनावुपादेयो रौद्रादि
ध्वनौ त्वनुपादेय एव-अलंकारो यमकादिः रसादिध्वनावनुपादेयश्चित्रभेदे तूपादेय एव-तथा च दोषादिनिरूपणोपयोगिषु काव्यविशे
षभेदेषु निरूप्यमाणेषु प्रसंगाद् नुपयोगिनो दि निरूपणीया इत्युल्लासत्रयेण काव्यभेदत्रयभेदो निरू पणीयः॥ तत्र प्रथमे ध्वनि
भेदः॥ तत्र तावद्ध्वनिर्द्विधः-अविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्च-तत्र यद्यप्यभिधायाः प्राथम्यात्तन्मूलको विवक्षितान्यपरवा
च्य एव प्रथमं निरूपयितुमुचितः तथापि लक्षणामूलव्यंजनायाः प्राक्‌ निरूपणात्तत्सम्बन्धिनःत्वेव प्राक्त निकं क्रमनुपादाय सूचीक
टाहन्यायेन वा प्रथममाद्यमुद्दिश्य विभजते-अविवक्षितवाच्योयस्तत्र वाच्यं भवेद्ध्वनौ-अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृ
तं-वाच्यः वाच्यजातादिधर्माणां धर्मी अविवक्षितो वाच्येन रूपेणान्वयबोधविषयतया ऽनपेक्षितो यत्र सः॥ तत्र यद्यप्यविवक्षि
तवाच्यमात्रस्य नायं विभागः किंतु तद्विशेषस्य ध्वनेः॥ न तु शब्दात्तथावगमः॥ तथापि यत्तदो रेकार्थपरामर्शकतया तत्र ध्वना वि

=च्येन रूपेणेति-अर्थान्तरसंक्रमितवाच्यसंग्रहार्थमिदं-अनपेक्षितस्तात्पर्यविषयः॥ कुंतानामपि वाच्येन माधान्यरूपेणानपेक्षणात्तं प्रति॥२॥

मिततस्मानांतरप्रयोजनापेक्षत्वमसादिति=

४८

-अयंचेति वाच्यार्थाविवक्षायां लक्षणाविषयेसंभवादितिभावः। लक्षणामूलेति लक्षणयामूलंप्रयोजनतयाहेतुभूतं तेननिरूढलक्षणायाम् अदर्शितकाव्यीयध्वनेरुदासः। ध्वनौ व्यङ्ग्यप्राधान्येचवाच्यातिशायितोपलक्षकेतेनाव्यविपरजणीभूतव्यं ... त्यादितिः

तितच्छब्दार्थस्यध्वन्यन्तरे[दे] यच्छब्दार्थोपि ध्वनिरेवलभ्यते। अयंचध्वनिर्द्वेधा लक्षणामूलगूढव्यंग्यप्राधान्येसति संभवति। विवक्षितत्वंच वाच्यस्यान्वयानुपपत्तेः। साचवाच्यस्यान्वयानुपयुक्तत्वेनोपयोगिनिरूपान्तरेतात्पर्याद्वा स्वतएवान्वयायोग्यत्वाद्वा। अनुपयुक्तत्वमपि पुनरुक्तत्वाद्विशेषानाधायकत्वमात्राद्वा। तत्रोभयत्रापिवाच्यमर्थान्तरेउपयोगिनिलक्ष्यतावच्छेदकेसंक्रमितम्। आश्रयत्वेनपरिण मितं वाच्योप्यर्थोरूपान्तरेणलक्ष्यतइत्यर्थः। द्वितीयेतुवाच्यमत्यंततिरस्कृतंनकेनापिरूपेणान्वयप्रविष्टं। तत्राद्यार्थान्तरसंक्रमित वाच्यंपुनरुक्तेर्यथा। ताला जाअंतिगुणा जाला ते सहिअएहिं घेप्पंति। रइकिरणा[redacted]णुग्गहिआइं होंति कमलाइं कमला इं। अत्रद्वितीयकमलशब्दःसौरभ्याद्गुणयुक्तत्वरूपेलक्ष्येसंक्रमितवाच्यः। विशेषानाधायकत्वमात्राद्यथा। त्वामस्मिवच्मि विदुषांसमवायोत्रतिष्ठति। आत्मीयांमतिमास्थाय स्थितिमत्रविधेहितत्। अत्रवच्मीत्यनुपयुक्तार्थे। संबोध्यतयैवयुष्मदर्थस्यवचन कर्मतावगतेः। वच्मीत्युत्तमपुरुषेणैवास्मदर्थस्यतत्कर्तृत्वप्रत्ययात्। अतस्ताभ्यांतस्योपदेश्यत्वोपदेष्टृत्वयोर्लक्षणयोः संक्रमितौ

-उभयत्रापि अनुपयुक्तेभेदद्वयेपि आश्रयत्वेनपरिणमितामितिभावेनपरिणतिया

२ त्वनुपयुक्तार्थे। अनुपादानेपिवचनक्रियाप्रतीतेः। अतउपदेशत्वं लक्ष्यंतत्रवाच्यार्थःसंक्रमितः। एवंत्वामस्मीतिपदेऽप २

अन्यपरिणामस्यासंभवादाह वाच्योपीति। ततश्च धर्मान्तरप्रकारकबोधविषयीकरणमेवात्रपरिणमनमितिभावः। ५२ लक्ष्यमितितत्साधनत्वं ... २ संबोध्यतयैवेति युष्म तदाक्षिपतीति संबोध्यस्यतत्रोपदेशत्वेन ... विसर्गः। १२

=तामित्युपदेश्यसलक्षणमूलमवाप्यवाच्याद्वितारितत्वंव्यंग्यं· तथाह्येमीत्युपदेश्यलक्षणमूलं चानुपलंघनीयात्वात्तं आत्मीयाभिसंधाविर्गीतपक्षाभ्युपगतं च व्यंग्यं·१२

प्रदीपः

२५ 25

तथा आत्मीयाया एवमतेः सर्वैरस्मानादत्तुपयुक्तत्वेनात्मीयशब्देन प्रमाणपरिगृहीतत्वे लक्ष्यमाणे तद्वाच्यं संक्रमितं· अस्मद्युत्तमइत्यत्रार्थग्र
हणाद्विस्मियोगेपिव चीत्युत्तमपुरुषः। असंततिरस्कृतं यथा· उपकृतं बहु तत्र किमुच्यते सुजनता प्रथिता भवता परं· विदधदी
दृशमेव सदा सखे सुखितमास्व ततः शरदां शतं· अत्रापकारिणं प्रत्ययामोग्येरूपकृतादिपदैः स्वार्थविपरीतं लक्ष्यते· न च तत्र
वाच्यस्य कथंचित्प्रवेशः। तथैवमपकारेपि क्रियमाणे मया प्रियमेवोच्यत इति स्वसाधुत्वं व्यंग्यं· तवोपकारापकारवि
वेको नास्तीति वा· अयं च प्रभेदो न केवलं विरोधिलक्षणया किं त्वन्यत्रापि· यथा मम· आधत्त सस्वेदकरेत्यजायाः स्मि
तावगूढप्रतिकूलवाचः। प्रियो विहायाधरमायताक्ष्याः पयोधिरस्य प्रतिषेधमेव· अत्र पपाविसृयनेन सोत्कंठनिरी
क्षणं लक्ष्यं· उत्कंठातिशयो व्यंग्यः। द्वितीयं ध्वनिभेदं कारिकार्धेनाप्युद्दिश्य विभजते· विवक्षितं चान्यपरं वाच्यं यत्रा
परस्तु सः। ध्वनिरितिप्रकरणाल्लभ्यते· अन्यपरं· व्यंग्योपसर्जनीकृतं· अयं भेदो। द्विधाक्रमलक्ष्यव्यंग्यप्राधान्ये सति

शिवः
२५

=अन्यपदनिरस्तान्यतासर्वकामित्सर्थव्यंग्येनासर्वविषयसानभ्युपगमात्संभवत्स्मनीयमाचष्टे· व्यंग्येतिवाच्यस्य चित्रगुणीभूतव्यंग्यादीनामित्यालेः।१२

=रसादीति॥ तत्र॥ अविवक्षितवाच्यस्यैते भेदा विनिरूपिताः॥ १॥ पंचदशेति॥ शब्दशक्तिमूलो द्विविधः वस्त्वलंकारभेदात्॥ अर्थशक्तिमूलो द्वादशविधः॥ शब्दार्थोभयशक्तिमूलस्त्वेकविध इति पंचदशभेदा भवंत्येते॥ २॥ नन्वसंलक्ष्यक्रमो ध्वनिः प्रदीपवदिति

द्रष्टव्यः॥ एषस्तु॥ कोप्यलक्ष्यक्रमव्यंग्यो लक्ष्यव्यंग्यक्रमः परः॥ सूचीकटाहन्यायमाश्रित्यालक्ष्यक्रमव्यंग्यस्य पूर्वमुद्देशः॥ तस्यैकत्वात्॥ द्वितीयस्य तु पंचदशभेदत्वात्॥ विभावादय एव न रसः॥ किंतु रसस्तैर्निर्व्यधत इत्यस्ति [redacted] विभावादिरसप्रतीत्योः क्रमः॥ स तु न लक्ष्यत इति क्रमस्यालक्ष्यत्वं लक्ष्यत्वकृतं भेदद्वयमित्यर्थः॥ रसभावतदाभासभावशांत्यादिरक्रमः॥ भिन्नो रसाद्यलंकारादलंकार्यतया स्थितः॥ अक्रमः॥ अलक्ष्यक्रमः॥ तच्छब्देन रसभावयोः परामर्शः॥ आदिग्रहणाद्भावोदयभावसंधिभावशबलत्वानि॥ नन्वाभासवद्रसस्य शांत्यादयः किं नोक्ताः॥ निरंतरावयवस्यापरिच्छिन्नस्य निरतिशयस्य वैद्यांतरसंपर्कश्चन्यस्य तदभावात्॥ आभासत्वं तु तिर्यगाद्यधिकरणतया अविरुद्धं॥ भिन्न इति॥ यत्र प्रधानं रसादिस्तत्र ध्वनिर्यत्र त्वप्रधानं तत्रालंकार इति भावः॥ रसस्वरूपमाह॥ कारणान्यथ कार्याणि सहकारीणि यानि च॥ रत्यादेः स्थायिनो लोके तानि चेन्नाट्यकाव्ययोः॥ विभावा अनुभावास्तत्कथ्यंते व्यभिचारिणः॥ व्यक्तः स तैर्विभावाद्यैः स्थायिभावो रसः स्मृतः॥ अथेति समुच्चये॥ कारणा

=निरंतरेति॥ निरंतरा अविच्छिद्यमाना अवयवा विभावादिरूपा यस्येत्यर्थः॥ रसस्य विभावाद्यनुसंधानजीवितत्वेन तद्विच्छेदरूपाया शांतेरसंभववत्स्यर्थः॥ नहि विभावाद्यननुसंधाने शाम्यत्स्वरूपः स्थायी केनाप्यभिव्यक्तुमलं॥ तात्कालिकस्तु॥ अथाल्पना
=रसः परिच्छेदरवनरसस्य शांतिर्वा चासामिनेसारः अपरिच्छिन्नस्येति॥ एवमप्यनभिव्यक्तस्य रसस्यैकरूपत्वात्परोक्षकरूपायि शांतिर्न संभवतीत्याह॥ निरतिशयस्येति॥ संधिशबलयोरपि निरासायाह॥ वेद्यांतरेति॥ ३॥

भोगाद २

कमोगपरसंच लक्षोवी
भरसभाष्यविषयमंतर
भानप्रतिबंधकालस्या
कुभयवलनक्रमहतात्

=शृंगारेति नायकोपलक्षणं ॥१॥ =मत्तोऽस्कानविता: ॥१॥ =वाग्मनोबुद्धिभावी नैवारंभोऽपेयं ॥२॥ =आदिनाविलासविब्बोकादय: ॥२॥ =तेषु कटाक्षादिषु समकम्पस्त्वादेस्तनादि विचित्रांकितकादितकार्यजननायोगेन सामग्रीवैचित्र्यापारकत्वान्नेयं सम्यक् ॥ विहितमिति भाव: ॥२॥

प्रदीपः
२६
26

निर्भरे इ इत्यादीनि कारकोद्दीपकरूपाणि कार्याणि स्वेद: स्तंभोऽथ रोमांच: स्वरभंगोऽथ वेपथु: ॥ वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विका: स्मृता:
वाग्मनोबुद्धिशरीरारंभरूपाणि च कटाक्षभुजप्रक्षेपादीनि सहकारीणि तेषु जनयितव्येषूत्कंठादीनि विभावा: आलंबनोद्दीपनरूपा:
चेत्यर्थ: ॥ तत्र: नदेत्यर्थ: ॥ यद्यपि उद्दीपकस्य स्थायिनिनुकारणत्वं किंतु स्वन्नेतस्मिन्नीबद्धुकर्षाधायकत्वरूपमुद्दीपक
त्वं तथाप्यनुद्दीपितोऽप्यजातप्राय एवेत्युद्दीपकेपि कारकतोपचारस्तत्रापि विभावव्यवहार: ॥ विभावादिसंज्ञाच विभावना
दिव्यापारयोगात् तद्यथा वासनारूपतया स्थितान्र त्यादीन्स्थायिनो विभावयंति रसास्वादांकुरयोग्यतां नयंतीति विभा
वा: ॥ अनुभावयंति च तानित्यनुभावा: पोषकतया विशेषेणाभित: काये स्थायिनं चारयंति विशेषेणाभिमुख्येन चरंतीति
वाव्यभिचारिण: ॥ व्यक्त: स इति व्यक्तिश्चर्वणेति पर्याय: ॥ सा च विशेषणं तथा च व्यक्तिविशिष्ट एव स्थायी रस: ॥ एवं च रसस्याका
र्यत्ववचनं विभावादिभि: कार्योपस्थापितै: स्थायिनो: जननात् विभावादिकार्यतायाएव प्रकृतत्वाद्विशिष्टत्वस्य कार्यतानव

शिवः

=अंकुरयोग्यतामिति ईषदभिव्यक्तेति भाव: ॥ अनुभावयंतीति न त्वंच स्थायिन: स्फुटाभिव्यक्तेरिति बोध्यं एवं पोषकत्वं तस्य स्फुटतराभिव्यक्तत्वबोध्यं ॥३॥ =पर्यायइति नतु भयमभिव्यावर्णासिद्धेरेव तात्कुः ॥ विशेषणमिति नतु पज्जसांगं ॥२॥ =[redacted]
=[redacted] अकार्यत्ववचनं सच नकार्य इत्यादिनाव समाणं कार्योपस्थापितै: सीतारामादिभि: स्थायिनध्रुति: रसीभवनयोग्यस्य सामाजिकगतरत्यादेरित्यर्थ: ॥ एवमपि यत्किंचित्कामिनीजन्यत्वमस्त्येवेत्यत आह विभावादीति २६
=विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति पदस्य विभावादीनां ... जन्यताया: ... प्रतिबंधक विनहात्काव्योपात्तैरेव विभावादिभि: स्थायिनो जननं ... कार्यत्ववचनमत आह ॥

=अनपेक्षकत्वादिति नीलपटवत्। १=भेजवंसमुदाय: तत्रवाप्यापिनहेतुसमितिवाधंसंनुयोग्यं। १=समुदायस्यानतिरेकात् अभेदेवेति अनादेयमिति अकार्यत्वस्योक्तदोषोपपत्ते:। २= तज्जातीयैरिति स्वमतुनगवद्रंगतजातवद्धसाधितात्मसे
=रनिर्वचनीयैरनन्त:करणपरिणामभूतैरित्यर्थ:। ३=विरुद्धानांत्यादेर्विशेषादय:। अविरुद्धानांत्यौत्सुक्यादय:। ४=उत्पत्तिरित्यादेर्विभावेनेत्यादित्रीयांतत्रयेण यथाक्रममन्वय:। ५=

सा

छेदकत्वाद्या। तस्मात्स्थायीन रस:। किंतु विभावादिकमेलनकं अलेववा। अन्यथा न कार्यत्वसादित्वं प्रविरोधादिप्रलपितमनादेयं। सतै:। यस्य यानिकारणानि सतैः तज्जातीयैरित्यर्थ:। स्थायी। विरुद्धैरविरुद्धैर्वा भावैरनिरस्कृतप्रवाहो भाव:। यदुक्तं। विरुद्धा अविरुद्धा वायं तिरोधातुमक्षमा:। आनंदांकुरकंदोसौ भाव: स्थायिपदास्पदमिति। नचेयं स्वकल्पना। सत्रकारस्य उक्तं हि नरतेन। विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति। एतद्विवरणं एवं तेभट्टलोल्लटप्रभृतय:। स्थायिनां विभावेनोत्पाद्योत्पादकभावरूपादनुभावेन गम्यगमकभावरूपाद्व्यभिचारिणा पोष्यपोषकभावरूपात्संबंधाद्रसस्य निष्पत्तिरभिव्यक्ति: पुष्टिश्चेत्यर्थ:। तथाहि। ललनादिभिरालंबनविभावै: स्थायी रत्यादिको जनित:। उद्यानादिभिरुद्दीपनविभावैरुद्दीपित:। अनुभावै: कटाक्षभुजप्रक्षेपप्रभृतिभि: प्रतीतियोग्य: कृत:। व्यभिचारिभिरुत्कंठादिभि: परिपोषितो रामाद्यावनुकार्ये रस:। नटे तत्तुल्यरूपतानुसंधानवशादारोप्यमाण: सामाजिकानां चमत्कारहेतुरिति तदेतदपेशलं। सामाजिकेषु तदभावेन तत्र चमत्कारानुभवविरोधात्। न च तज्ज्ञानमेव चमत्का रसनि॥

=आरोप्यमाण इति। रामादिगत: सीतादिविषय एव न सादिरस: सहृदयेन काव्योपात्तकटाक्षादिलिंगैस्तदावनुमीयते। ततस्तस्य कमनीयविभावाद्यभिनयप्रदर्शननिपुणेन नटे माध्यत्वकारिणि नटे साध्ययकान रूपसाध्यादावोप: साक्षात्कारात्मकबोधं
=मंप्रते लौकिकमारोप्यात्मसलौकिक: रामोयं सीताविषयकरतिमानित्याकारश्चमत्कारहेतुरिति संग्राम:। नचसाध्यम्यस्यभेदगर्भसाधार्थतातिकार्यतामत्साध्याद्येप्रतिवाच्यं। भेदगर्भत्वस्य तत्र स्माभेनिराकरिष्यमाणत्वात्

वैपरीसेत्यनहि चंदनसुखयावोपश्रमातिरेकुनत्पितु चंदनसुखमेवेति भावः॥२॥ चित्रतुरंगोयमिति॥ तुरंगचज्ञानं घानंजजानान्न विकल्प्यतुच्यते भाव्यज्ञानादुपातीयस्तु अन्यो विकल्प इति तत्सूत्रार्थः॥ ननु सीताविषयकरतिभावकारणादिमत्संनेत्र्यसिद्धुः

प्रदीपः
२७
27

रहेतुः॥ लौकिकश्रृंगारादिदर्शनेनापि चमत्कारप्रसंगात्। नचानुभावविज्ञानबलायातआरोपस्तथा न तु साक्षात्कार मात्रमिति वा
च्यं। चंदनसुखादौ वैपरीत्यदर्शनात्। अन्यथैवोपपत्तौ तादृशकल्पनायां प्रमाणाभावाच्च। श्रीशंकुकस्तु। स्थायिनो विभावादिभिरनु
माप्यानुमापकभावरूपसंबंधाद्रसस्य निष्पत्तिरनुमितिरित्यर्थः॥ तथाहि। नियमविषयाधीः सम्यग्बुद्धिः॥ यथा राम एवायम
यमेव राम इत्ययोगान्ययोगव्यवच्छेदविषये अनंतरावतीर्णबाधा तु मिथ्याधीः॥ यथोत्तरकालिके बाधे रामोयमिति। विरु
द्धोभयकोटिका तु संशयः॥ यथा अयं रामो नवेति। सदृशोयमिति विषयाधीः सादृश्यधीः॥ यथा रामसदृशोयमिति। ताभ्यो लोक
प्रसिद्धाभ्यो विलक्षणया चित्रतुरगोयमिति वद्रामोयमिति बुध्या प्रथमं पक्षभूतो नटो विषयीक्रियते। ततस्तत्रा विघ्नमा
नमपि विभावादित्रयं लिंगमवगम्यते कुतः॥ पूर्वमेव रोमांचाद्या विर्भावनेयुरुशिक्षाभ्यासाद्यद्भुतानि शिक्षितान्यासेन न
टेन। सेयं ममांगेषु सुधारसच्छटा सुपूरकर्पूरशलाकिका दृशोः॥ मनोरथश्रीर्मनसः शरीरिणी प्राणेश्वरी लोचनगोचरं गते

शिवः
२७

=भावपक्षभेदेन पुनः पुनरनुभावं ४= रामोयंसीताविषयकरतिमान् सीतायालकविभावादिसंबंधित्वात् सीताविषयककथगादिमत्वाद्यन्नैवं तन्नैवं यथाद् इति प्रयोगः २= अनाविलिंगैः सीताविषयकरतिमावाविलिंगैरपि अस्त्राकादिति भूलीपकादिकमाप्यतेना = पणोविदिताः १

ति दैवादहमधनयाचपलायतनेत्रया वियुक्तश्च अविरलविलोलजलदः कालः समुपागतश्चायमित्यादिकाव्यानुसंधानबला
दालंबनोद्दीपनव्यक्तौ तदनुगुणस्य रोमांचादेर्दर्शनीयस्यादिर्जावनेन व्यंजनीयस्य व्यालंकणादेस्तत्कार्यप्रकटनेन च प्रकाश
नात् अथ तैः कृत्रिमत्वेनातल्लिंगैरपि कृत्रिमत्वेनाज्ञानात् स्थायीरत्यादिरनुमीयते सैव चानुमितिः स चमत्कारप्रतीति
रूपा चर्वणा अतस्तया विषयीक्रियमाणः स्थायीरस इत्युच्यते चर्वणा च सामाजिकानामिति तेष्वेव रस इति व्यवहारः
ननु साक्षात्कार एव स चमत्कारो न त्वनुमित्यादिरपि अन्यथा सुखादावनुमीयमानेपि सा स्यात् न स्यात् वस्तुसौ
दर्यबलादास्वादनीयत्वेन स्थायिनामन्यानु[redacted]मेयवैलक्षण्यात् तथापि स्थायिनां न तेषु साक्षात्कारे ऽनुमिति
रेव कथं स्यादिति चेन्न अभावनिश्चयाभावात् स्थायिनया संभाव्यमानत्वादिति तदप्युक्तं हृदययाहि यतः प्रत्यक्षमेव दर्श
नं स चमत्कारं नानुमित्यादिरिति लोकप्रसिद्धिमवधूयान्यथा कल्पने मानाभावः तत्र स्यान्यथैव योजना संभवात् मह

=उलंकणकार्यं स्नान= =दिवादि २=

[illegible]

द्रसस्यचानिष्कृतत्वा२

पं२

नायकस्तु·नतावन्नटगतत्वेननरामगतत्वेनानुमीयतेनवोत्पद्यतेनसामाजिकगतत्वेनव्यज्यते·आद्यपक्षयोरुक्तदोषात्·अन्यगतेना
न्येषांचमत्काराभावाच्च·अंत्येसिद्धस्यैवव्यंग्यता·सर्वेषामेवाभिव्यक्तिप्रसंगाच्च·तस्माद्विभावादिभिःसंयोगाद्भोज्यभोजकभावसंबंधा
त्रसस्यनिष्पत्तिर्भुक्तिरितिसूत्रार्थः।नचभोगपक्षेपिदोषावकाशः।भोगस्यालौकिकत्वात्·तथाप्यन्यनिष्ठःस्थायीअन्यनिष्ठै
रेवविभावादिभिःकथमन्येनभोक्तव्योतिप्रसंगइतिचेत्·उच्यते·शब्दात्मनःकाव्यस्यत्रयोव्यापाराः·अभिधाभावकत्वं
भोजकत्वंच·तत्राभिधानिरंतरसांतरार्थनिष्ठत्वेनद्विधा·भावकत्वंसाधारणीकरणं·तेनहिव्यापारेणविभावादयः
स्थायीचसाधारणीक्रियंते·साधारणीकरणंचैतदेवयत्सीतादिविशेषाणांकामिनीत्वादिसामान्येनोपस्थितिः
स्थाय्यनुभावादीनांचसंबंधिविशेषानवच्छिन्नत्वेन·अंत्यंव्यापारद्वयंनाद्येपि·एवंकाव्येनाद्येद्वितीयव्यापारेण
साधारणीकृतैर्विभावादिभिस्तृतीयव्यापारसाहित्येनतथाकृतएवस्थायीभुज्यते·भोगश्चसत्वगुणोद्रेकात्प्रकाशानंदमय

[illegible]

=आनंदरूपेति सत्त्वगुणकार्यश्चिन्नवृत्तिविशेषस्तत्स्वरूपेति पुरुषे वृत्तिप्रतिबिंबेन तत्साक्षात्कारत्वमेवलक्षणं संख्यमते पुरुषे वृत्तिप्रतिबिंबेन तत्समानाकारत्वमेव तद्विषयकज्ञानमिति भावः अनन्येति अन्यत् अवलंबं च विभावादिस्थाय्यपेक्ष्य अन्वयेन वर्ण
=निष्पीड्यमानस्य व्यतिरेकभावः यथा दिवसादिनामनुभूतानां कथंचित्तात्संततिरूपजायते न च व्यंजनमात्राहितैर्वासितं भावनाभोगाभ्यामिति ॥ १२ ॥ झटिति प्रवृत्तिभिः अभ्यासादिगोचरपटुत्वं संस्कारेण झटिति प्रवृत्तिभिरित्यर्थः ॥ ६ ॥ श्रीमतत्त्वरहस्यरूपत्व

आनंदस्तत्त्वं रूपा अनन्यालंबनाया संवित्तत्स्वरूपो लौकिकसुखानुभवविलक्षणः सत्त्वरजस्तमसां गुणानामुद्रेकेण क्रमात्सुख
दुःखमोहाः प्रकाश्यंते उद्रेकश्च स्वेतरएवभिभूयावस्थानमिति सांख्यसिद्धांतानुसारेण विवृणुते तदपि न सम्यक् एता
दृशव्यापारद्वयकल्पने प्रमाणाभावात् भुक्तेर्ज्ञानातिरेकस्यानुभवबाधितत्वेन निष्पीड्यमानस्याभिव्यक्तिपक्ष
एव पर्यवसानात् आचार्याभिनवगुप्तपादास्तु स्थायिनां विभावादिभिः समं व्यंग्यव्यंजकभावरूपात् विभावा
दीनामेव वा परस्परं संयोगाभिजनाद्रसस्य निष्पत्तिरभिव्यक्तिः तथाहि लोके प्रमदादिभिः कारणादि
भिः स्थायिनो रत्यादेरनुमाने अभ्यासेनपटुत्वं झटिति प्रवृत्तिस्तद्वतां सामाजिकानां संस्कृतयांतः स्थितो रत्यादिः स्थायी काव्येनाद्येव
गुणालंकारयोगात् चतुर्विधाभिनयेन च यथोक्तविभावनादिव्यापारबलादलौकिकविभावादिशब्दव्यपदेशयोग्यदशाविशिष्टैः
तैरेव कारणादिभिर्व्यज्यते ननु एवं येषां पूर्वं रत्यादिर्नोपलब्धस्तेषां तद्वासनाविरहिणां किं रसाभिव्यक्तिर्नास्त्येव कः संदेहः अतएव
=भावादिव्यंजकोवेषः ॥ १२ ॥=

=तदुक्तं कायिको वाचिकश्चैव आहार्यः सात्विकस्तथा चत्वारोभिनयाः प्रोक्ता नाट्यशास्त्रविशारदैरिति ॥ २ ॥ अलौकिकेति अस्य कारणत्वादिपरिहारेण सादिः ॥ २ ॥ नद्वतामिति यद्यप्यत्रानुमानं न प्रस्तुतं तथापि … नाट्य व्यापिकानामेवैतादृशाभिव्यंजनावता
=शेनेत्यभिप्रायः … तदुक्तं आगमस्तेनाभिव्यक्तिरत आह सूक्ष्मतयेति ॥ ३ ॥ नोपलब्ध इति … वा व्यक्तावपिवाेध्यं ॥ १ ॥

= नश्यतीति· एवंचरसादिनिरूपितविभावादिनिष्ठव्याप्तिग्रहज्ञानोद्बुद्धसंस्कारः भाव्यभावनाजन्यसहृदयताप्रयोजकसंस्कारः रसादिवासनाः स्थायिनित्यंरसाभिव्यक्तिहेतुः। २= व्यासहृदयव्यपदेशप्रयोजिका· १=

प्रदीपः

२९ वश्शृंगारिणामेवश्शृंगारस्यानिर्विल [redacted] स्वभावानामेवशांतस्याभिव्यक्तिरित्याद्यनुभूयते· किंच· अपरापि स्वाभाविकीवासनासह
कारिणीयांविनाश्शृंगारिणामपिवैयाकरणमीमांसकादीनांन रसाभिव्यक्तिः। तदुक्तं· वासनाचेन्नहेतुःस्यात्सःस्यान्मीमांसकादि
ष्विति· ननु तथाप्यन्यनिष्ठैर्विभावादिभिः कथमन्यनिष्ठस्यस्थायिनोभिव्यक्तिः। उच्यते· ममैवैतेशत्रोरेवैतेतटस्थस्यैवैतेइति सं
बंधिविशेषस्वीकारनियमस्यनममैवैतेनशत्रोरेवैतेनतटस्थस्यैवैतेइतिसंबंधिविशेषपरिहार नियमस्यचाज्ञानात्तेषां
साधारण्येनप्रतीतेः। साधारण्येनप्रतीतिश्चनसर्वसंबंधितयाप्रतीतिः किंतुसंबंधविशेषीयत्वेनाप्रतीतौप्रतीतिः। यद्वा· अमुकस्यैवे
त्यवधारणंविनामुकस्येत्येवंप्रतीतिः। अतएवोक्तं· ममैवैतेनइतिनियमानध्यवसायादिति· तथाचस्वीयत्वासंसर्गाग्रह
स्वीयत्वसंसर्गाग्रहप्रयोजनं [redacted] संपद्यते· एवंचवाक्यार्थबोधेसंबंधिविषयत्वानुभवोपिनविरुध्यते· संसर्गबोधे
संबंधीनविषयः किंतुपदार्थस्मरणएवेत्यनुभवविरोधाद्विचारसहत्वाच्चानुपादेयं· नन्वेवंविभावादीनांसाधारण्यंविनात शिवः

= अत्रेदंतत्त्वं· शक्त्यापदजन्यपदार्थोपस्थितौ प्रपंचनं विशिष्टप्रतीतावपिअनंतरं बंधअनयामुकसाधारण्येनोपस्थितौ सामाजिकानां = रम्यसीतादिपदघटितकाव्येइत्यर्थः। २= मतांतरमाह· संसर्गेति· २= पदैतिमतंसहृद्यासंवादी· ४= ·२९
= स्वनिष्ठरसादेरवचर्वणा· एवंचभावदयंरामस्यसीतेत्यादिज्ञानं तावन्नचमत्कारहेतुः तत्रसहृदयानुभवएवप्रमाणं· अतएवकाव्यश्रवणादिदशायांस्वपरविभागानुभवोनजायतेइतिसहृदयसंमतं· २=

=विभावत्वादिव्याघाताद्यंजकत्वव्याघाताद्वेत्यर्थः। १=साधारण्येन विभावादेरूपस्थापकत्ववत्याद्रिसर्थः। २=भावो रत्यादिः। ४=सुखात्मकस्यात्मनोऽभिव्यक्तिरित्यर्थः। आनंदात्मकत्वाद्रसस्येति भावः। ५=अभिन्नस्यापीति चर्वणारूपत्वानादिसादिः। आनंद
=तत्सम्यमिति सकलसामाजिकहृदये तत्रतस्य साधारण्यस्य स्वनाधिका विषयस्वमात्रहृदिरसादव संभवादनुभवाद्धेति भावः। १=तदेवं तत्सामान्ये। १=तादृशस्वीकारे साधारण्यस्वीकारे कारणं प्रयोजकमित्यर्थः। प्रस्तुपलक्षणं स्वगतत्वेनाभिव्यक्तौ बीज

तद्व्याघातास्तु साधारण्यं॰ स्थायिनस्तु तत्कथं स्यात्तस्य तत्तदात्मनिष्ठत्वात्॰ यद्यप्यसाधारण्येन तस्य न रसप्रतीतिविरोधस्तथापि तद्देशे सहृदय
संवादेन स्यात्॰ स एवचालौकिकतादृशस्वीकारे कारणमिति चेदुच्यते॰ उपायानां विभावादीनामुक्त[redacted]रूपसाधारण्यबलाद्रसानुभ
वकाले स्थायिनां प्रमातृविशेषनिष्ठत्वलक्षणायाः परिमितप्रमातृतायाः यद्विगलनमज्ञानं तद्वशेनोन्मीलितो वेद्यान्तरसंपर्कशून्योऽपरि
मितो भावो यस्य तेन प्रमात्रा सकलसहृदयसंवादकारिणा प्रमातृविशेषसंबंधाग्रहरूपेण साधारण्येन स्थायी चर्व्यते॰ ननु चर्व
णाविशिष्टः स्थायी रस इत्युच्यते चर्वणया च स्थायी विषयीक्रियतां नतु सुखात्मक आत्मेति न रसव्यक्तिरिति चेन्न॰ स्वप्रका
शानन्दैकाकारवदभिन्नस्याप्यात्मनो विषयीकरणं तत्॰ अभिव्यक्तिविशिष्टश्च रत्यादिः स्थायी चर्व्यमाणस्तैकप्राणतया चर्वणा
नाशे विनश्यन् रस इति प्रतीतिविषयो विभावादिजीवितावधित्वेनापि स चर्वणः पुर इव परिस्फुरन् हृदयमिव प्रविशन् सर्वांगीण
मिवालिंगन्नन्यत्सर्वमिव तिरोदधद्ब्रह्मास्वादमिवानुभावयन्नलौकिकचमत्कारकारी शृंगारादिको रस इत्युच्यते॰ नन्वे

=संवादकारिणेति साधारण्येन तस्य विशेषणं॰ तथाचकामिनीविषयकरतित्वसामान्येन प्रमातृविशेषानालिंगितत्वमेव साधारण्यमित्यर्थः। ५=नन्विति विभावादिसमुदायावलंबनेन नर्त्तव्यच्छिन्नचैतन्याभिव्यक्तिश्चर्वणा सा च भग्नावरणा
=चित्॰ तया चर्वणीति विषयीक्रियतां॰ अंतःकरणधर्माणां साक्षिभास्यत्वात्तथात्वे दुःखकाद्यवगाहदपि अभेदात्॰ स्वप्रकाशत्वेन साक्षिव्यक्तेरानंदानुभवस्तस्मादित्यर्थः। स्वप्रकाशानंदात्मेति मत्वाभिन्नस्यापि विषयीकरणमुक्तमिति ज्ञेयं तत्राह॰ स्वा
=कारवदिति॰ यथा ज्ञानस्यैकाकारो घटादिस्तद्भेदभिन्नोऽपि तद्विषयो भासते तद्वत् रसस्य विषयीक्रियतेत्यर्थः॥ तत्र रसस्थायिभावसमष्टीसापत्तिस्तत्राह॰ अभिव्यक्तीति॰ अभिव्यक्तेरुपलक्षणत्वे स्थायित्वादुक्तदोषः। साक्षि

[illegible]

प्रदीपः

३०

30

=नहीसर्वं॥१५=

वंस्याधि विभावादिसमूहालंबनात्मिकारसप्रतीतिरिति पर्यवसन्नं· नचैवं नयुक्तं· विभावादीनां पार्थक्येन प्रतीतिप्रसंगात्· घटपटावि ति समूहालंबनवदिति चेन्न· पानकरसन्यायेन चर्वणात्· यथा पानके कर्पूरादेः पार्थक्येनानुभूयते तथात्रापि विभावाद्यंशेः· ननु विभावादीनां परामर्शस्यान्वयव्यतिरेकान्ते कार्य एव रसः किं नोच्यत इति चेन्न· विभावादिपरामर्शस्य कारणत्वं यदि स्यात्तदा निमित्त कारणत्वमेव नच तन्नाशस्य कार्यनाशकता दृष्टा· द्वित्वादीनां तथात्वानभ्युपगमात्· चंदनादिस्पर्शजन्यसुखादिन्यायेन विध्यती तिचेन्न· नहि तत्र स्पर्शाभावेन सुखं विनाश्यते किंतु तद्भावे कारणाभावात्कार्यं नोत्पद्यते· उत्पन्नस्य सुखस्य तर्हि कथं विनाश इति चेत्· विरोधिगुणांतरात्· अत्रापि तथैवास्त्विति चेन्न· रसस्य वेद्यांतरसंपर्कशून्यतया ज्ञानांतरादेस्तत्कालेऽभावात्· नन्वेषदोषो व्यक्तावपि समान इति चेन्न समानः व्यक्तेर्लौकोत्तरतया दोषासंस्पर्शात्· किंच चर्वणाविशिष्टः स्थायी रसः। न च काव्याद्युपस्थाप्याविभावादिर्विशिष्टहेतुः तर्ह्यस्तु ज्ञाप्य इति चेन्न· विभावादिपरामर्शं विना तत्सिद्धेरभावात्· न चैकैव सामग्री निष्पादिका ज्ञापिका चे

शिवः

=स्वपर्यालोचनाप्राप्यस्याभिमतपदं·५=अथ ॥ अ॰ व्यंजकत्वस्य सर्वः अलौकिकत्वेति·व्यंजनाया अलौकिकत्वं वदतां तदस्माकं अनुकूलमेवैतदित्यर्थः ॥४॥ =जगदेकेति जगद्भिन्नत्वेनात्मज्ञानमित्यर्थः ॥५=

अलौकिकहेतुकत्वं = २

तिसंभवति·किंच·स्वाभिन्नतज्जन्यज्ञान विषयो हि तज्ज्ञाप्य उच्यते·अतएव स्वप्रकाशनयेपि·चाक्षुषादिज्ञानं न चक्षुरादिज्ञाप्यं स्वक्रियु
ते·नचात्रतथा·स्वाभिन्न[redacted]तज्जन्यज्ञानविषयतयैव तु तज्ज्ञाप्यत्वं न निषेधामः॥ किंतु विभावादिभिर्व्यंजितश्चर्वणीयः कार
कज्ञापकाभ्यामन्यो हेतुर्न लोकसिद्ध इति चेत्·अलौकिकत्वसिद्धेर्भूषणमेतन्न दूषणं·कथं तर्हि विभावादिभिरुत्पन्नो रसो ज्ञेयो
रस इत्यादिव्यवहार इति चेत्·आद्यस्तावच्चर्वणोत्पत्तौ तत्रोत्पत्त्युपचारात्·द्वितीयोपि गुणालंकाराद्यसंभिन्नरसादिविषया
लौकिकी प्रतीतिः यच्चापरिपक्वयोगिनां युंजानपदवाच्यानां जगद्द्विषयकत्वशालि विज्ञानं यच्च परिपक्वयोगिनां मुक्त
पदाभिधेयानां बाह्यार्थसंस्पर्शरहितं स्वात्ममात्रविषयं संवेदनं ताभ्यां गुणालंकारमुक्तरसादिमात्रविषयतया विल
क्षणं यत्संवेदनं तद्गोचरतयेति मंतव्यं·न केवलमसत्त्वाद्ज्ञाप्यो रसः किंतु नोपि·यतस्तद्ज्ञापकं न निर्विकल्पकं·विभा
वादिपरामर्शस्य निर्विकल्पकजननायोग्यत्वात्·नापि स्वाभिन्नसविकल्पकं·चर्व्यमाणस्यालौकिकानंदमयस्य स्वसं

आदिनाविभाव
दि:

=स्वात्मकसंवेदनेत्यर्थः। तथाच स्वाभिन्नं यत्तद्विषयकं न प्रसिद्धमिति भावः ॥१॥ =एवं हीति। निर्विकल्पकविषयताभावो न स्वाभिन्नसविकल्पकविषयत्वेनैव पर्यवस्यति अपितु स्वाभिन्नसविकल्पकविषयत्वेनापि तथा स्वाभिन्नसविकल्पक

वेदनमात्रसिद्धत्वात्। चर्वणादशायां ज्ञानान्तराभावात्। स्वाभिन्नसविकल्पकविषयत्वेन ज्ञाप्यत्वमिष्टमेव। ननु निर्विकल्पकस्वा
भिन्नसविकल्पकयोरन्यतरविषयताभावोऽपरविषयत्वपर्यवसन्नः। तथा चैकविषयताभावेऽपरविषयत्वप्रसक्तिरस्तु
न यविषयताभावेऽन्यतरविषयत्वं प्रसज्यत इति चेन्न। एवं सुनयरूपत्वमापाद्यमानं स्वाभिन्नसविकल्पकविषयतया
लोकोत्तरचमत्कारमेवगमयतीति न पुनर्विरोधमिति। अथ विभावादयो मिलिताः किमिति व्यंजकत्वेन निर्दिष्टाः। एकैक
स्य व्यंजकत्वे व्यभिचारात्। अपि एकैकस्मादन्यद्वयाक्षेपात्त्रयाप्यस्य रसव्यक्तिरित्यव्यभिचार इति चेन्न। व्याघ्रादयो वि
भावा भयानकस्येव वीराद्भुतरौद्राणां। अश्रुपातादयोऽनुभावाः शृंगारस्येव करुणभयानकयोः। चिंतादयो व्यभिचारिणः
शृंगारस्येव वीरकरुणभयानकानामिति अन्यद्वयाक्षेपानियमात्। नन्वेवं मिलितस्येव व्यंजकत्वे एकैकोपस्थितौ
रसव्यक्तिर्न स्यात्। दृश्यते च सः। यथा। वियदलिमलिनांबुगर्भमेघं मधुकरकोकिलकूजितैर्दिशां श्रीः। धरणिरभि

=अंबुगर्भेति पयोदनिर्दिष्टआषाढमासि कोऽभिनवो मेघ उक्तः। अत एव कोकिलस्य लतासु तालकोकिलकूजितत्वं ॥ ३१

विषयताभावोऽपि न निर्विकल्पकविषयत्वेनैव पर्यवस्यति अपितु स्वाभिन्नसविकल्पकविषयत्वेनाप्यौचित्येनाविरोधः सूचितः ॥२॥

शिवः

=मनःप्रसादोहर्षःस्यादित्युक्तेःप्रसादोहर्षःव्यभिचारिषु तस्यैवपरिगणनात्॥५॥ =विभावोपलक्षणमुद्दीपनसंग्रहार्थं अनुभावव्यभिचारिव्यवच्छेदेतात्पर्यात्॥ यद्यपिप्रणतिकपोलनुभावोवाविषुकत्वमपि

=गोलकं॥७=

दितम॰

नवांकुरांकटंकाग्रणतिपरे दयितेप्रसीदस्तुग्धेइत्याद्यैकामिनीगतायारतेरालंबनमात्रस्योपस्थितौ॰ एवं॰ परिम्लाणलीम्लानमंगंप्रवृत्ति
:कथमपिपरिवारप्रार्थनाभिःक्रियासु॰ कलयतिचहिमांशोर्निःकलंकस्यलक्ष्मीमभिनवकरिदंतच्छेदपांडुःकपोलः॥ इत्यादावंगग्लान्या
द्यनुभावमात्रस्य॰ दूरादुत्सुकमागतेविवलितंसंभाषिणिस्फारितंसंश्लिष्यत्यरुणंगृहीतवसनेकिंचांचितभ्रूलतं॰ मानिन्या
श्चरणानतिव्यतिकरेबाष्पांबुपूर्णेक्षणंचक्षुर्जातमहोप्रपंचचतुरंजातागसिप्रेयसि॰ इत्यादावुत्सुकादिविशेषणव्यंग्या
नामौत्सुक्यलज्जाहर्षकोपासूयाप्रसादानांव्यभिचारिमात्राणां॰ यद्यप्यत्रप्रेयसीत्यालंबनविभावोप्यस्तितथापिरसनुकू
लधर्मवत्त्वयानिर्देशाद्नास्तिक्षत्यएवेति॥ एवं॰ एषांविभावादीनामसाधारण्येनान्यद्वयाक्षेपकत्वेनात्राऽपिमिलितानामेव
व्यंजकत्वात्॰ नन्वेषांचेदसाधारण्यंकिमन्यद्वयाक्षेपणेन॰ एकैकव्यभिचारेणहित्रयोपादानं॰ अथसाधारण्यमेवकथंत
र्हिस्यापिविशेषयोग्यविभावाद्याक्षेपकत्वमिति॰ उच्यते॰ एकस्यव्यभिचारेमिलितानांव्यंजकत्वेस्थितेऽसाधारणेनापि

=अत्राक्षेपेति॰ तत्रायेप्रणतिरनुभावः॰ प्रसादप्रार्थनोक्त्यासूयासंचारिणी॰ द्वितीयेप्रकरणगम्यौमालतीमाधवौविभावौ म्लानतादिरनुभावचिंताव्यभिचारिणी॰ तृतीयेमानिनीप्रेयांसौविभावौचरणानतिरनुभावइतिबोध्यं॥३=
=इदंचरसःश्लोकेतदुपादानेनस्फुटविबोधप्रसंगात्प्राधिकागतदतोदितदिवक्षितेतादृशःप्रसीदेत्युक्तिगम्याअंगस्यान्पाद्यत्वात्तुभावाभवितव्यं॥१=अत्रापिमाधवोविभावइसेवमालतीनिष्ठरसस्यविवक्षितत्वात्॥१=दृशांकेप्रेयान्नेवाविभावः॥

[illegible]स्यमाणनवमेपठ्यतोयत्नावश्यत्रयःस्वत्वतीकंठाभरणेप्रदर्शितः॥२=नन्विवासायेति॥उक्तानांत्रयाणांमुख्यभिचारिविंवनभर्ववस्त्वमत्रस्यइं॥३=तावंतएवेति॥नततोन्यूनाततिनाधिकाव्यवच्छेदः॥अतःकाव्येयंतोव्यक्तिनवमोन्तःशांतिवक्ष्यमाणोनन्विवेति॥५=
·भावयुक्·

प्रदीप:

३२ 32

इतरद्वयमाक्षिप्यते·किंच·रसस्यविभावाद्यालंबनरूपत्वादेकैकस्मादसाधारणादभिव्यक्त्यभावान्मिलितानामेवाभिव्यंज
कत्वं·अतो ऽसाधारणेप्यपीतरद्वयमाक्षिप्यते·ततोमिलितैरेवतदभिव्यक्तिरिति·केचित्तुएकएवशृंगारोरसः·केचिद्वादशे
ति·तन्निरस्यन्रसभेदानाह·शृंगारहास्यकरुणरौद्रवीरभयानकाः॥बीभत्साद्भुतसंज्ञौचेत्यष्टौनाट्येरसाःस्मृताः॥शांतस्य
रोमांचादिविरहेणानभिनेयतयाकाव्यमात्रगोचरत्वाभिधानान्नाट्यइत्युक्तं·यद्वा·नाट्येतावदष्टौरसाःप्रतिपादिताः·अतःका
व्येपितावंतएवेत्यर्थः॥ननुरसःसुखात्मकइतिप्रतिपादितंतत्कथंदुःखमयःकरुणादिकोरसइतिचेन्न·लोकेतथात्वेपि
काव्यादौपार्यंतिकालौकिकसुखोदयात्·अन्यथाप्रेक्षावतामप्रवृत्त्यापत्तेः॥शृंगारादीनांचलक्षणंरसाद्यप्रकृतिक
त्वं·तत्रमनोनुकूलेष्वर्थेषुसुखसंवेदनंरतिः॥तत्प्रकृतिकोरसःशृंगारः॥सद्विधा·संभोगोविप्रलंभश्च·तत्र·अनुकूलौ
निषेवेतेयत्रान्योन्यंविलासिनौ·दर्शनस्पर्शनादीनिससंभोगोमुदान्वितः॥सचपरस्परावलोकनालिंगनादिभेदादपरि शिव: ३२

=सुखजनकेतनमार्गं·१=

णोयइ्समेकएवगण्यते। भावोयदारतिर्नामप्रकर्षमधिगच्छति। नाधिगच्छति चाभीष्टं विप्रलंभस्तदोच्यते। सच संगमपूर्वस्तदन्यश्च।
तत्राद्योभिलाषहेतुकइत्युच्यते। अभिलाषपदेन तद्धेतोरनादिसंगमाभावस्य लक्षणात्। आद्यस्तु क्वचिदीर्ष्यया क्वचित्प्रणयेन
वामानरूपः सईर्ष्याहेतुकइत्युच्यते। ईर्ष्यापदेन मानहेतोरुपलक्षणात्। क्वचित्तु कार्यवशाद्देशांतरस्थितेः सप्रवासहेतुको
भिधीयते। उभयमानोसत्स्यमानावपि प्रवासोस्त्वज्ञानद्वारा विप्रलंभप्रयोजकाविति नाव्याप्तिः। प्रवासशब्देन ज्ञानलक्षणा
या। क्वचिच्छापात् सच शापहेतुकइतिव्यवह्रियते। क्वचित्तु कुलजितमातिरिक्तात् गुरुलज्जादितः कारणात् स एव विरहहेतु
कइत्युच्यते। करुणशृंगारस्याप्यत्रैवांतर्भावः। तत्र संयोगो नायिकारब्धो नायकारब्धश्च। क्रमेणोदाहरणं। शून्यंवासगृ
हंनिरीक्ष्य शयनादुत्थाय किंचिच्छनैर्निद्राव्याजमुपागतस्य सुचिरं निर्वर्ण्य पत्युर्मुखं। विश्रब्धं परिचुंब्य जातपुलकामा
लोक्य गंडस्थलीं लज्जानम्रमुखी प्रियेण हसता बाला चिरं चुंबिता। आलोक्येति लज्जया समानकर्तृकं। त्वं मुग्धासि विनैव

=विरहहेतुक इ= अत्र नायक आलंबनं। शून्यगृहं नायकनिद्रा उद्दीपनं। मुखनिर्वर्णनचुंबनाद्यनुभावः। लज्जाव्यभिचारिभावः। तत्तुनियसंगवारणाय लज्जाप

=अत्र मुग्धा स्वालंबनं। नयनसौंदर्यमुद्दीपनं। आभाषणवीटिकास्पर्शावनुभावौ। उत्कंठादयो व्यभिचारिणः।२= अत्र मालत्यालंबनं। तद्विलासानुस्मरणमुद्दीपनं। आशंसानुभावः। तच्चिंतोत्कंठा संचारी।४=

प्रदीपः

३३ 33

कंचुलिकया धत्से मनोहारिणीं लक्ष्मीमित्यभिधायिनि प्रियतमे तद्वीटिकासंस्पृशि। शय्योपांतनिविष्टसस्मितसखीनेत्रोत्सवा
नंदितो निर्यातः शनकैरलीकवचनोपन्यासमालीजनः॥ वीटिकावसनग्रंथिः। विप्रलंभेऽभिलाषहेतुको यथा। प्रेमार्द्राः प्र
णयस्पृशः परिचयादुद्गाढरागोदयास्तास्ता मुग्धदृशो निसर्गमधुराश्चेष्टा भवेयुर्मयि। यास्वंतःकरणस्य बाह्यकरण
व्यापाररोधी क्षणादाशंसापरिकल्पितास्वपि भवत्यानंदसांद्रो लयः॥ प्रेम स्नेहः। स एव प्रकृष्टः प्रणयः। स एव परिचया
तिशयेन रंजनक्षमो रागः। ईर्ष्याहेतुको यथा। सा पत्युः प्रथमापराधसमये सख्योपदेशं विना नो जानाति सविभ्रमांग
वलनावक्रोक्तिसंसूचनं। स्वच्छैरच्छकपोलमूलगलितैः पर्यस्तनेत्रोत्पला बाला केवलमेव रोदिति लुठल्लोलोदकै
रश्रुभिः॥ सख्येनोपदेशः सख्योपदेशः। विप्रवासहेतुको यथा। प्रस्थानं वलयैः कृतं प्रियसखैरस्रैरजस्रं गतं
धृत्या न क्षणमासितं व्यवसितं चित्तेन गंतुं पुरः। यातुं निश्चितचेतसि प्रियतमे सर्वे समं प्रस्थिता गंतव्ये सति जी

शिवः ३३

=लुठल्लोलोदकैरिति। निमेषाद्यवरुद्धबिंदुजालतया लुंठनमिति पक्ष्मप्रसारिपतनशीलत्वेन चलोलमुदकं येषां। लुठल्लोलाश्च के इति तैः पांडुपलक्षस्थलीयां बके विरहच्च सते। पतिरालंबनं अपराधमुद्दीपनं रोदनमनुभावः=
=वः तच्चिंतादयो व्यभिचारी भावः।३= प्रस्थानमिति। अत्र प्रियमालंबनं तत्प्रयाणमुद्दीपनं कार्श्यादयोऽनुभावाः तच्चिंतादयो व्यभिचारिभावाः॥२= सख्येति। कर्तृत्वे तृतीया तुल्यत्वबाधाभावः उभयोः संयोगाभावेनोपमाप्रसक्त्यभावः।२=

वितप्रियसुहृत्त्वार्थः किमुसज्यते· नतप्रवासहेतुर्यथा मम· कियद्बृन्दवसुंधरायां कतिचापल्लवसंचयानवेयुः। कियती च समृद्धिरंकुरानांप रि
तापोपक्रियेत येः कृशांग्याः। सख्याः प्रवासिनं नायकं प्रतीयमुक्तिः। नवचन्द्रहेतुकोयथा मम मेव· किं मृदुपरिस्वेदघसे कतिपये रेवा प्रियेवास
रेशायालावयमेहिघेहिपरितः प्रास्थानिकं मंगलं· एवं वादिनि वल्लभे दयितया निश्वस्य पालोकृता मंगल्यः कलशो विलोचनपयोधा
रानिराशूरितः। शापहेतुकोयथा· हामालिरवप्रणयकुपितांधातुरागैः शिलायामात्मानं ते चरणपतितं यावदिच्छामिकर्तुं अ
स्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे क्रूरस्तस्मिन्नपि न सहते संगमं नौ कृतांतः। आलिख्येत्यपीच्छाविषय एव· विरहहेतुकोय
था· अन्यत्र व्रजतीति का खलु कथा नाप्यस्य ताहक्सुहृद्योमांनेच्छति नागतश्च सहसा कोयं विधेः प्रक्रमः। इत्यस्येतरकल्पनाक
वलितस्वांता निशांतांतरे बाला वृत्तविवर्त्तनव्यतिकरा नाप्नोति निद्रां निशि· एषा विरहो त्कंठिनेत्यपि नायकहेतुकादैन्यघते· व्यंगव्रीड
दिभिश्चेतो विकासो हास उच्यते· व्यंगं वैकृतं· तेन हास प्रकृतिको हासः। यथा· आकुंच्य पाणिमशुचिं मम मूर्ध्नि वेश्या मंत्रांभसां प्रतिपदं

पो२

=अत्र नायिका आलंबनं तत्प्रणयकोपउद्दीपनं चरणपाताद्यनुभावः। कृतांतेऽसूयाभिचारी·४= प्रियमालंबनं· निशादिकमुद्दीपनं· निद्राभावादिरनुभावः। चिंता संचारी। २=

एषतैः पवित्रे· तारस्वरं प्रहितयत्कमहात्मशारंशहारुनोहमिति रोदिति विष्णुशर्मा· अत्र नाश्यमानो विष्णुशर्मा तत्क्रन्दनं च विभावौ रसाश्रयस्य
एतद्वाक्यमनुभावः। चापलादिर्व्यभिचारीति· इष्टनाशादिभिश्चेतोवैक्लव्यं शोकशब्दभाक्· आदिग्रहणादनिष्टाप्तिः। शोकप्रकृतिकः करु
णः। यथा· हा मातस्त्वमसि क्वासि कुत्र किमिदं हा देवताः क्वाशिषो धिक्प्राणान्पतितोऽशनिर्हुतवहस्तेऽङ्गेषु दग्धे दृशौ· इत्थं घर्घरमध्यरु
द्धकरुणाः पौराङ्गनानां गिरश्चित्रस्थानपि रोदयन्ति शतधा कुर्वन्ति भित्तीरपि· अत्र विपन्ना काचिदीश्वरी संबोध्यमाना दग्धदारुश्च
विभावो· प्रतिकूलेषु तैक्ष्ण्यस्य प्रबोधः क्रोध उच्यते· तत्प्रकृतिको रौद्रः। यथा कृतमनुमतं दृष्टं वा यैरिदं गुरुपातकं मनुजपशुभि
र्निर्मर्यादैर्भवद्भिरुदायुधैः। नरकरिपुणा सार्धं तेषां सभीमकिरीटिनामयमहमसृङ्मेदोमांसैः करोमि दिशां बलिं· कार्यारंभेषु संरं
भः स्थेयानुत्साह उच्यते· तत्प्रकृतिको वीरः। स च त्रिधा· युद्धवीरो दानवीरो दयावीरश्च· तत्राद्यो यथा· क्षुद्राः संत्रासमेते वि
जहित हरयः क्षुण्णशक्रेभकुम्भा युष्मद्देहेषु लज्जां दधति परममी सायका निष्पतन्तः। सौमित्रे तिष्ठ पात्रं त्वमसि नहि रुषां नन्वहं मेघनादः शिवः

म६३

=रोदनमनुभावः। दैन्यग्लानिमूर्च्छादयः संचारिणः॥ =वीरवरविवेचकत्वेन रौद्रस्योदः। कृतमित्यादि· भीमादय आलंबनं पितृहन्तृत्वमस्मानुपमानं वोद्दीपनं· प्रतिज्ञानुभावः। अन्यैस्तेरपेक्ष्यगर्वोऽमर्षः संचारी॥=

अत्र राम आलंबनं जलधिनियमनमुद्दीपनं नीचोपेक्षारम्भे स्वदर्पश्चानुभावौ ऐरावतकुंभस्थलचूर्णनस्फालितैर्लक्ष्मीदृष्टिगर्वोद्योग(?)संचारिणौ ॥ १ ॥ ग्रीवेति दुष्यंत आलंबनं शरपतनभयमुद्दीपनं पलायनं ग्रीवाभंगश्चानुभावाः शंकात्रासस्मायाः संचारिणः ॥ ४ ॥

किंचिच्छ्रूनं गलीला नियमितजलधिं राममन्वेषयामि ॥ अपराधकृत्(?)नीयो रौद्रस्तस्यानुजनितं चित्तवैक्लव्यदं भयं । तत्प्रकृतिको भयानकः ॥ यथा ॥ ग्रीवाभंगाभिरामं मुहुरनुपतति स्यंदने बद्धदृष्टिः पश्चार्धेन प्रविष्टः शरपतनभयाद्भूयसा पूर्वकायं ॥ दर्भैरर्धावलीढैः श्रमविवृतमुखभ्रंशिभिः कीर्णवर्त्मा पश्योदग्रप्लुतित्वाद्वियति बहुतरं स्तोकमुर्व्यां प्रयाति ॥ जुगुप्सा गर्हणार्थानां दोषमाहात्म्यदर्शनात् । तत्प्रकृतिको बीभत्सः ॥ यथा ॥ उत्कृत्योत्कृत्य कृत्तिं प्रथममथ पृथूच्छोफभूयांसि मांसान्यंसस्फिक्पृष्ठपिंडाद्यवयवसुलभान्युग्रपूतीनि जग्ध्वा ॥ आर्तः पर्यस्तनेत्रः प्रकटितदशनः प्रेतरंकः करंकादंकस्थादस्थिसंस्थं स्थपुटगतमपि क्रव्यमव्यग्रमत्ति ॥ स्थपुटं निम्नविषमं ॥ विस्मयश्चित्तविस्तारो वस्तुमाहात्म्यदर्शनात् । तत्प्रकृतिकोऽद्भुतः ॥ यथा ॥ चित्रं महानेष बतावतारः क्व कांतिरेषाभिनवैव भंगिः ॥ लोकोत्तरं धैर्यमहो प्रभावः काप्याकृतिर्नूतन एष सर्गः ॥ एषां भेदो वचनमात्रान्न सिध्यतीत्येषां विचित्रानुरूपान् स्थायिभावानाह ॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा ॥ जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः ॥ तत्र विरुद्धा अविरुद्धा वा

उत्कृत्येति प्रेतरंक आलंबनं मांसादनमुद्दीपनं तद्दर्शनात् नासासंकोचवदनविधूननिष्ठीवनादयोऽनुभावाः उद्वेगादिः संचारी ॥ ५ ॥ चित्रमिति वामन आलंबनं कांतिगुणातिशय उद्दीपनं स्तवादयोऽनुभावाः मतिधृतिहर्षा ॥ ६ ॥

[right margin:] वाः शंकात्रासस्मायाः(?) संचारिणः ॥ ४ ॥ वेगादयः संचारिणः ॥ ६ ॥

प्रदीपः
३५
35

यंतिरोधातुमक्षमाः। आनंदांकुरकंदोऽसौ भावः स्थायिपदास्पदमिति सामान्यलक्षणं। अवस्थितिश्चैषां स्वकल्पन्यायेन। फेनबुद्बुद
न्यायेन तु व्यभिचारिणां भिन्नयोर्भेदः। विशेषलक्षणान्युक्तानि। अष्टावेव चेत्स्थायिनोऽतो न्यूनाधिकशंकावसरो निरस्तेति। यद्यपि वि
भावानुभावप्रतिपाद्यव्यंजकत्वपुरस्कारेण व्यभिचारिभेदोपदर्शनेन कश्चिन्न्यायस्तथापि व्यंग्यसद्भावविवेचनाय निर्वेदस्या
पि व्यवस्थापनाय च व्यभिचारिभेदानाह। निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः। आलस्यं चैव दैन्यं च चिंता मोहः स्मृ
तिर्धृतिः। व्रीडा चपलता हर्ष आवेगो जडता तथा। गर्वो विषाद औत्सुक्यं [redacted] निद्रा विस्मृतिरेव च। स्वप्नो
नो विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता। मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च। त्रासश्चैव वितर्कश्च विज्ञेया व्यभिचारि
णः। त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः। नामत एव समाख्याता न तु लक्षणतः। लक्षणानि नामन्यैरेव प्रपंचितत्वा
त्। तद्यथा। तत्त्वज्ञानापदीर्ष्यादेर्निर्वेदः स्वावमाननं। तत्र चिंताश्रुनिश्वासवैवर्ण्योच्छ्वासदीनताः। चित्तस्य खेदो निर्वेदस्तत्त्व

शिवः
३५

नोत्पादिभिरितिकेचित्॥ रत्यायासक्लमाभ्यासात्क्षामता निःप्राणतेवया॥ तस्यां वैवर्ण्यकंपानुत्साहकार्श्यादयोमताः॥ अनर्थप्रतिभाशंका
परक्रौर्यात्स्वदुर्नयात्॥ वैमुख्यकंपवैमुख्यपार्श्वालोकास्यशोषकृत्॥ परोत्कर्षाक्षमासूयागर्वदोषैर्जन्यमन्युजा॥ दोषोद्घोषभ्रूविभेदावज्ञा
क्रोधेंगितादयः॥ संमोहानंदसंभेदः स्खलदंगवचोगतिः॥ मधुपानादिजो ज्ञेयो मदो विविधभावकृत्॥ उत्तमसत्वः प्रहसति गायति तद्व
च्च मध्यमप्रकृतिः॥ परुषवचनाभिधायी शेते रोदित्यधमसत्वः॥ श्रमः खेदोध्वरत्यादेः श्वासनिद्रामरादिकृत्॥ श्रमग्लान्योर्विभे
दं तु चक्रे कारणकार्यता॥ श्रमस्यातिशयावस्थामथवा ग्लानिमूचिरे॥ बलस्यापचयो ग्लानिराधिव्याधिप्रकर्षजनुरित्येके
आलस्यं श्रमगर्भादिजं ज्लाजृंभाक्रियादिकृत्॥ दौर्गत्यादेरनोजस्या दैन्यं कार्श्यामृजादिमत्॥ ध्यानं चिंता हितानाप्तेः शून्य
ताश्वासतापकृत्॥ प्रयत्नपूर्विकान्वेष्यस्मृतिश्चिंतेतिकेचन॥ मोहो विचित्तता भीतिदुःखवेगानुचिंतनैः॥ घूर्णनाज्ञानप
तनभ्रमणादर्शनादिकृत्॥ सदृशज्ञानचिंताद्यैः संस्कारोज्जायते स्मृतिः॥ भ्रूसमुल्लासकरजवाद्नादिस्तदुद्भवः॥ अ

प्रदीपः
३६
36

भीष्टार्थस्य संप्राप्तौ स्पृहापर्याप्तता धृतिः। सौहित्यवचनोल्लाससहासप्रतिभादिकृत्। दुराचारादिभिर्व्रीडा धार्ष्ट्याभावोऽभिधीय
ते। वस्त्रांगुलीयकस्पर्शनखरेखाधोमुखादिकृत्। चेतोनिमीलनं व्रीडाव्यंगरागस्तवादिभिरिति केचित्। मात्सर्यद्वेषरागा
देश्चापलं त्वनवस्थितिः। आत्मप्रकाशनपरा चेष्टा चपलतोच्यते इति केचित्। तत्र भर्त्सनपारुष्यस्वच्छन्दाचरणा
द्यः। मनःप्रसादोल्लासोऽत्र हर्षोऽश्रुस्वेदगद्गदादिकृत्। आवेगो राजविद्रावरस्यादेः संभ्रमो मतः। तत्र विस्मरणं स्तंभः स्वेदः
स्खलनं स्खलद्गतिः। अप्रतिपत्तिर्जडता स्यादिष्टानिष्टदर्शनश्रुतिभिः। अनिमिषनयननिरीक्षणतूष्णींभावादयस्त
त्र। क्रियास्वपाटवं जाड्यं चिन्तोत्कण्ठाभयादिभिरित्येके। गर्वोऽभिजनलावण्यधनैश्वर्यादिभिर्मदः। सविलासांगवी
क्षाविनयावज्ञादिकृत्तु सः। प्रारब्धकार्यासिध्यादेर्विषादः सत्वसंक्षयः। निःश्वासोच्छ्वासहृत्तापसहायान्वेष
णादयः। कालाक्षमत्वमौत्सुक्यं रम्येच्छारतिसंभ्रमैः। तत्रोच्छ्वासत्वराश्वासहृत्तापस्वेदविभ्रमाः। निद्राव्यापारवै

शिवः
३६

[redacted]

आधिश्चासंतदुःखादेरपस्मारस्तथाविधः। मनःक्षेपस्त्वपस्मारो ग्रहावेशादिसंभवः इति केचित्। र

सुखमिंद्रियाणांश्रमादिभिः। तत्र जृंभांगभंगाक्षिमीलनोच्छ्वासनादयः। विरोधिभावात्सर्वस्य प्रस्मृतिर्विस्मृतिर्भवेत्। ध्यानजाड्यप्रमोहाधि
परितापादिकृत्तु सा। स्वप्नो निद्रामुपेतस्य विषयानुभवस्तु यः। कोपावेगभयग्लानिसुखदुःखादिकारकः। निद्रापगमहेतुभ्यः प्रबोध
श्चेतनागमः। जृंभांगभंगनयनमीलनाङ्गावलोककृत्। अधिक्षेपापमानादेरमर्षोऽभिनिविष्टता। तत्र स्वेदः शिरःकंपनेत्ररागांगविक्षेपाः
लज्जाद्यैर्विक्रियागोपोऽवहित्थाऽन्यविक्रिया। व्यापारांतरसंगित्ववदनानमनादयः। क्षिप्तपराधदौर्मुख्यचौर्याद्यैश्चंडत्वमुग्रता। अ
त्र स्वेदशिरःकंपताडनातर्जनादयः। भ्रांतिच्छेदोपदेशाभ्यां शास्त्रादेस्तत्त्वधीर्मतिः। स्मेरताधृतिसंतोषौ बहुमानस्तथात्म
नि। व्याधयः सन्निपाताद्यास्तेषामन्यत्र विस्तरः। प्रस्वेदकंपतापाद्या अनुभावतयोदिताः। उत्कंठाहर्षशोकादेरुन्मादश्चित्तविभ्र
मः। तस्मिन्नस्थानरुदितगीतहासासितादयः। जीवस्योत्क्रमणारंभो मरणं परिकीर्तितं। संमोहेंद्रियसंग्लानिगात्रविक्षेपणादि
कृत्। अत्र मरणस्थाने केचित्करुणं पठंति। सा च परदुःखप्रहाणेच्छारूपत्वाच्चित्तवैक्लव्यमभावकोटिनातिरिच्यते इति

प्रदीपः
३७
37

तद्गणनमत्रानुचितमत्रानुचितमित्येके· अन्येतु तस्यादयावीरस्यापित्वमित्यत्र लक्षणानौचित्यमित्याहुः। नचान्यत्र संचारित्वाद्गणनं फ
लवदिति वाच्यं· स्थायित्वं तु रसाधारणत्वात्· तेपि हि क्वचन संचारिणः। तदुक्तं· शृंगारवीरयोर्हासो वीरे क्रोधस्तथापरः। शांते जुगुप्सा
कथिता व्यभिचारितया पुनः। इत्याद्यन्यत्समुन्नेयं स्वयंभाविनबुद्धिभिरिति· गर्जितादेर्मनः क्षोभस्त्रासो त्रोत्कंपितादयः। ऊहो वि
तर्कः संदेहस्त्र शिरोंगुलिनर्त्तकः। निर्वेदस्यामंगलप्रायस्य प्रथमान्निर्देश्यते पि प्राङ्निर्देशो मुख्यप्रकाशनेन स्थायित्वप्रतिपादना
य· तेन निर्वेदस्थायिभावाख्यः शांतो पि नवमो रसः। तत्कृतिकत्वात्· अहौ वा हारे वा बलवति रिपौ वा सुहृदि वा मणौ वा लोष्ठे
वा कुसुमशयने वा दृषदि वा· तृणे वा स्त्रैणे वा मम समदृशो यांतु दिवसाः क्वचित्पुण्येरण्ये शिव शिव शिवेति प्रलपतः।
स्त्रैणं स्त्रीसमूहः। वाधाशम्यां द्वयोर्द्वयोस्तुल्यता द्योत्यते· अत्र वदंति· शांतो नाम नवमरसस्तावदनुभवसिद्धतया दुरप
ह्नवः। नचैतस्य स्थायी निर्वेदो युज्यते· तस्य विषयबलं प्रत्ययरूपत्वाद्दाल्मावमानन्नरूपत्वाद्वा· शांते च निखिलविष शिवः ३७

=अत्र मिथ्यात्वेन परिणाम्यमानं जगत्तत्त्वं अनंततपोवनाद्युद्दीपनं· अहिंसादिषु समदर्शनमनुभावः। मतिधृत्यादिर्व्यभिचारिणः।=

यपरिहारजनितात्ममात्रविश्रामानंदप्रादुर्भावमयत्वानुभवात्· तदुक्तं· यच्च कामसुखं लोके यच्च दिव्यं महत्सुखं· तृष्णाक्षयसुखस्यैते [redacted]
नार्हतः षोडशीं कलामिति· अतएव सर्ववृत्तिविरामोस्य स्थायीति निरस्तं· अभावस्यस्थायित्वायोगात्· तस्माच्छमोस्य स्थायी
निर्वेदादयस्तु व्यभिचारिणः। स च शमो निरीहावस्थायामानंदः स्वात्मविश्रमादिति· रसवद्भावोप्यलक्ष्यक्रमव्यंग्येषु पठितः
स किंरूपः रत्यादीनां रसरूपत्वात्· व्यभिचारिणां रसांगतानियमेन प्राधान्याभावात्· सात्विका नाम व्यंग्यत्वादित्यत आह· र
तिर्देवादिविषया व्यभिचारी तथांजितः। भावः प्रोक्तः। रतिरिति स्थायिभावोपलक्षणं· तेन देवादिविषया सर्वा· कांतादिवि
षयाप्यपुष्टा रतिः। हासादयश्च प्राप्तरसावस्थाः। प्राधान्येन व्यंजितो व्यभिचारी च भाव इस[illegible]व धात्व्यं· यदुक्तं· रसादिभ्ये
न्निरंगः साध्वादिविषयो थवा· अन्यांगभागभाग्वास्यात्र तदा स्थायिशब्दभागिति· तदेतदाह वृत्तिकारः। कांतादिविषयात्तु
व्यक्तः शृंगारः। तत्र देवाविषया रतिर्यथा· कंठकोणविनिविष्टमीश ते कालकूटमपि मे महामृतं· अप्युपात्तममृतं भवद्वपुर्भे

=अमनात्देवआलंबनं-दृशोपदभतिमाथाय्याहेतैश्वर्यम्ब्रुद्दीपनं-लवोनुभावः। धृतिमाहात्म्यस्मरणदर्पोआभिचारिणः।१= मुनिरालंबनं-यात्यत्तानिविधुद्दीपनं-स्तोत्रमनुभावः। माहात्म्यस्मरणंव्यभिचारि-२=

प्रदीपः

३८ दृदृन्ति यदिमे न रोचन्ते मुनिविषया यथा- हरस्य धंसंप्रति हेतुरेष्यतः श्रमस्य पूर्वाचरितैः कृतं शुभैः। शरीरआज्ञां जवदीयदर्शनं व्यन

३४ क्तिकालत्रितये पियोग्यतां- एवमभासपरिपोषापुत्रादिविषयारतिः स्थाय्यंतरं वा प्रधानार्थं- व्यभिचारी प्राधान्येन वर्णितो यथा- जा
नेकोपपहारा अनुखी प्रियतमास्व मेघदृष्टाम याभाभासं स्पर्शपाणिनेति रूदतीं गंतुं प्रवृत्तः पुरः। नोयावसारि रभ्यसाङ्कशस्ते
शश्वासयामि प्रियां भ्रातस्तावदहं शठेन विधिना निशादरिद्रीकृतः। अत्र विधिं प्रत्यसूया प्राधान्येन प्रतीयते- तदाभासा अ
नौचित्यप्रवर्त्तिताः। अनौचित्येन अकर्षविरोधिना रूपेणेत्यर्थः। तच्चैकाश्रयत्वे- तिर्यगादिविषयतायां बहुविषयत्वे व्यभि
चारिणाम भासांगतायां वाद्यष्टव्यं- एकविषयारतिरेव नेति तु प्रलापः। वंदीकृत्य नृप द्विषामित्यादा बुदाहरिष्यमाणत्वात्
रसाभासो यथा- स्तुमः कं वामाक्षि क्षणमपि विनायन्न रमसे विलेभे कः प्राणान् रणमखमुखेवयं मृगयसे- सुलग्ने को जातः
शशिमुखि यमालिंगसि बलात् तपः श्रीः कस्यैषा मदननगरि ध्याय सितु यं- अत्र बहुषु व्यापारोपादाने न बहुविषया शिवः

=प्राधान्येनेति-शठेस्ननेननिर्दोनायकाविलासात्प्राधान्यं- विधिरालंबनं-निदोऽर्जन्मस्युद्दीपकं-साञ्त्वोक्तिरनुभावः।१= एकेति-नायकनायिकान्यतरमात्राश्रयत्वेरतेरित्यर्थः।४= व्यभीति-व्यभिचारिणांनुभाभासांगतायांभावाभासत्वमित्यर्थः।५= ३८
·रतेः·

=तादृशोऽपि· तादृशानेकेसर्मः ।१= तुशब्देनेति· पंतुभ्यापसीति भ्यानकर्मी भूतस्मेलने भ्यो भेदमतीते भिन्नत्वमवगम्यते ऽतः सर्वेषामपि स्वनस्तनो भेदमतीति सिद्धं ।२= बहुपदं· बहुव्यापारोपादाननिमित्तमिति गतं·४= श्रीमद्गुदिमस्तावलोकितः ।४=

रतिर्व्यज्यते· नन्वत्र व्यापारस्य बहुविषयत्वमसिद्धं· एकत्रापि तादृशव्यापारसंभवात्· यत्त्वनेककर्मपदोपादानमनेकविषयत्वं क्रियायाः प्रक
टयति· एकविषयत्वाभिप्राये त्वेकमेव कर्मपदमुपाददीतेति तत्तुच्छं· स्तुमो विलेभे इत्यादीनां भिन्नवाक्यस्थानामेकविभक्त्यंतपदोपस्था
पितेनान्वये तरत्वयिनो भिन्नस्यापि कंकश्ल्यादिपदैरेवोपस्थापनार्हणात्· अत्र क्रमः। तुशब्देन व्यवच्छेदार्थेन व्यापारस्यानेकविष
यत्वं लभ्यते· एवमेकत्र भेदाभिप्राये ऽवगते ऽन्यत्रापि तथैवावगम्यते· बहुपदमनेकपरं वा· भावाभासो यथा· राकासुधाकरमु
खीतरलायताक्षी सस्मेरयौवनतरंगितविभ्रमास्या· तत्किं करोमि विदधे कथमद्य मैत्रीं तत्स्वीकृतिव्यतिकरे क इवाभ्यु
पायः॥ अत्र रतेर्व्यभिचारिणी चिंता अनौचित्यप्रवर्तिता· नायिकाया अननुरक्ततया रतेरनुत्कृष्टत्वेन तद्व्यभिचारिणोऽपि त
थात्वात्· एवमन्येप्युदाहार्याः। भावशांत्यादिक्रमः इत्यत्र भावशांत्यादिपदप्रतिपाद्यमाह· भावस्य शांतिरुदयः संधिः शबल
ता तथा· संधिरेककालमेव तुल्यकक्षयोरास्वादः। शबलता तु कालभेदेन निरंतरतया पूर्वपूर्वोपमर्दिनां· न च भावस्य प्र

=एवमिति· यथा पूर्वापालंबनतया रतेर्व्यभिचारिणी आलंबनतया नायिकायाः ... आलंबनतया ... वीभत्सस्य ... ।१=

= उपगमादिति। अयं भावः। यद्यपि शांतेऽर्थांतरोदय एव चमत्कारित्वं उदयस्य च शांतिपूर्वकत्व एव चमत्कारित्वमतएव च भावानां शांत्युदयौ ... एवं चैतद्भेदद्वयेऽप्यवगन्तव्यमयं कीतयापि पूर्वपूर्वोपमर्देन परोदये एव तस्या आस्वादनं तांगीकारादिह ... भावशांतिः

बलतायाः। शांत्युदयाभ्यामविशेषः। शांते रूपस्य स्वाद एकैकस्यास्वादे तद्भेदद्वयोपगमात्। तत्र भावस्य शांतिर्यथा। तस्याः सांद्रविलेपन
स्तनतटप्रश्लेषमुद्रांकितं किं वक्षश्चरणानतिव्यतिकरव्याजेन गोपाय्यते। इत्युक्ते क्व तदित्युदीर्य सहसा तत्संप्रमार्ष्टुं मया सा
श्लिष्टा रभसेन तत्सुखवशात्तन्व्यापि तद्विस्मृतं। अत्र कोपस्य शांतावेव चमत्कारविश्रामः। उदयो यथा। एकस्मिन् शयने वि
पक्षरमणीनामग्रहे मुग्धया सद्यो मानपरिग्रहग्लपितया चाटूनि कुर्वन्नपि। आवेगादवधीरितः प्रियतमस्तूष्णीं स्थितस्त
त्क्षणान्मा भूत्सुप्त इवेत्यमंदवलितग्रीवं पुनर्वीक्षितः। अत्रौत्सुक्यस्योदयः। संधिर्यथा। उत्सिक्तस्य तपःपराक्रमनिधेर
भ्यागमादेकतः सत्संगप्रियता च वीररभसोत्फालश्च मां कर्षतः। वैदेहीपरिरंभ एष च मुहुश्चैतन्यमामीलयन्नानंदी ह
रिचंदनेंदुशिशिरस्निग्धो रुणद्ध्यन्यतः। अत्र पूर्वार्धे संभ्रमात्मक आवेगः उत्तरार्धे हर्षः। अनयोस्तुल्यमेवास्वादः। शबल
ता यथा। क्वाकार्यं शशलक्ष्मणः क्व च कुलं भूयोऽपि दृश्येत सा दोषाणां प्रशमाय मे श्रुतमहो कोपेऽपि कांतं मुखं। किं वक्ष्यंत्यपक शिवः

= शांतावेवेति। एवं संभ्रमहर्षादेर्व्यवच्छेदकः ... भावयोस्तुल्यत्वात्। औत्सुक्यस्येति। ननु ... अपि कोपप्रशांते ... इति भावः। अनयोरिति। परिरंभजन्यहर्षसत्संगप्रियतोत्फालोभयजन्यतावेगस्तुल्यमिति भावः। ३९

कल्मषाः कृतधियः स्वप्नेपि सा दुर्लभा चेतः स्वास्थ्यमुपैहि कः खल्वनुपबाधन्यो धरं धास्यति· अत्र काकार्यमित्यादौ वि[redacted]तर्कः। न्रूयोपीसौत्सुक्यं· दो
षाणामिति मतिः। कोपेपीति स्मृतिः। किं वक्ष्यतीति शंका· स्वप्नेपीति दैन्यं· चेतःस्वास्थ्यमिति धृतिः। कः खल्विति चिंता· स्फुटं पूर्वपूर्वोपमर्देन प्रती
यमानश्शबलता चमत्कारभूमिः। ननु भावस्य शांत्यादिवत्स्थितिरपि प्रकारः संभवस्येवत त्कोनोक्त इति चेन्न· भावोक्त्यैव तदुक्तेः। भावस्थि
तेर्भावाभिन्नत्वात्· ननु व्यभिचारिस्थले नियमतो मुख्यस्य रसस्यावस्थानात्तत्कथं भावोदाहरणमेतत्कथं वा भावध्वनित्वं रसां
गत्वेन तेषां गुणीभावादिति सत्यमाह· मुख्ये रसेपि ते गित्वं प्राप्नुवंति कदाचन· ते भावशांत्यादयः। कदाचन यदा तेषां गित्वेन वि
वक्ष्यंते· विवक्षनप्रवृत्तराजानुगम्यमानभृत्यवत्· एवमसंलक्ष्यक्रमव्यंग्यभेदं विचार्य संलक्ष्यक्रमव्यंग्यभेदानाह· अनुस्वा
नाभसंलक्ष्यक्रमव्यंग्यस्थितिस्तु यः। शब्दार्थशक्त्युत्थस्त्रिधा स कथितो ध्वनिः। घंटायां हन्यमानायां मुख्यशब्दानंतरं यथा
क्षोदीयान परोनुरणनरूपः शब्दः प्रतीयते तद्वत्संलक्ष्यक्रमव्यंग्यस्यास्थितिर्यत्र सः। शब्दस्यार्थस्य उभयं चेति द्वंद्वः। तेन शब्द

प्रदीपः

४०

40

क्तिमूलव्यंग्यः अर्थशक्तिमूलव्यंग्यः उभयशक्तिमूलव्यंग्यश्चेति त्रिधेत्यर्थः। शब्दशक्तिमूलत्वं चैतदेव यत्तेनैव शब्देन तदर्थप्रतीतिर्न तु
पर्यायांतरेणापि। एतद्वैपरीत्येनचार्थशक्तिमूलत्वं न त्वभिधया तत्प्रतीतिरिति। एतेनाभिधायाप्यत्र न नियमनं तत्रैष भेदो द्रष्टव्यः
तन्नियमने तु नाभिधामूलत्वं किंतु व्यंजनामूलत्वमेव नष्टात्मन इति वक्ष्यवेदितियत्केनचिदुक्तं तन्नादेयं। नष्टात्मन इत्यादेरप्य
त्रैव दने घटत्वात्। अन्यथा तस्य सर्वभेदबहिर्भावापत्तेः। किंच। प्रथमोदाहरणे प्राकरणिकाप्राकरणिकयोरिति व्याख्यानेन द्वि
तीयेनवानित्यनेन तृतीये असीत्यनेन प्रकरणस्याभिधानियामकस्य स्पष्टत्वात्तेषामुदाहरणत्वं विरुध्येत। तस्मादयोक्तमेव
वन्याय्यं। तेषु मध्ये। अलंकारोऽथ वस्त्वेव शब्दाद्यत्रावभासते। प्रधानत्वेन सज्ञेयः शब्दशक्त्युद्भवो द्विधा। शब्दशक्तिरूपानुरण
न रूपव्यंग्यो द्विधा। अलंकृतस्यानलंकृतवस्तुमात्रस्य वा प्राधान्येन प्रकाशादित्यर्थः। तत्राद्यो यथा। उल्लास्य कालकरवालमहा
म्बुराशिं देवेन येन जरठोर्जितगर्जितेन। निर्वापितः सकल [redacted] एव रणे

शिवः

४०

रिपूणां धाराजले स्विजगति ज्वलितः प्रतापः। कालो वैरिसंहर्त्ता यः करवालः स एवांबुधाराजलं वहतीति महांबुवाहः। यद्वा महदुत्सवः स एवांबुतवाहः। गर्जितं सिंहनादः। अत्र करवालमुक्तास्य एतावन्मात्रे वक्तव्ये पदे तादृशशब्दप्रयोगः तस्यासंबद्धार्थकतामाप्रसज्यतामित्यप्राकरणिकेरिंद्रवारिवाहादिभिः प्राकरणिकानां राजकरवालादीनामुपमानोपमेयभावे कवेस्तात्पर्यमित्युपमालंकारो व्यंग्यः। स च शब्दशक्तिमूलः। पर्यायांतरेण भूपादिना तदर्थोपस्थितौ तदप्रतीतेः। एवमग्रेपूह्यं· एवमलंकारांतरा ण्यपि· यथा· तिग्मरुचिरप्रतापो विधुरनिशाकाद्विभोमधुरलीलः। मतिमानतत्ववृत्तिः प्रतिपदपक्षाग्रणीर्विभाति नृपवान्· अत्र तिग्मरुचिः अप्रतापः एवं क्रमेण एकैकपदस्य द्विपदत्वे विरोधाभासः। पदान्तरेपि विरोधाभासो यथा· अमितः समितः प्राप्तैरुत्कर्षैर्हर्षदः प्रभो· अहितः सहितः साधुयशोभिरसतामसि· ननु विरोधस्य किं सर्वत्र व्यंग्यत्वमेव· नेत्युच्यते· तत्कियती सीमाः अपि शब्दादेर्विरोधस्य व्यंजकस्य भावे वाच्यत्वं तदभावे व्यंग्यत्वमिति· निरुपादानसंभारमभित्तावेव तन्वते· जगच्चित्रं नमस्तस्मै कलाश्ला

प्रदीपः
४१
५१

ध्यायश्च लिने· चित्रं नानाकारं आलेख्यं च कलाचंद्रस्य षोडशो भागः कौशलं च· अत्रोपादानैर्भिन्नाचालेख्यकारिभिः कलावत्त्वः श्लिनोव्यति
रेकोव्यंग्यः। तस्या चित्रकलाशब्दयोः परिशिष्टस्य सत्त्वेन शब्दशक्तिमूलता· नन्वदाहृतेषूपमादीनां प्राधान्यं न वा· आद्ये कुतस्तेषामलंका
रत्वं अन्यानलंकरणात्· द्वितीये कुतोऽस्य काव्यस्य ध्वनित्वं· व्यंग्यस्याप्राधान्यादिति चेन्न· पूर्वमयमलंकार आसीदित्येतावताऽ
लंकारव्यपदेशात्· यथा ब्राह्मण[redacted]बौद्धसंन्यासिनि ब्राह्मणव्यपदेशः। नन्वेवं व्यपदेशासमर्थने पि अलंकारस्य ध्वनित्व
मसमर्थितमिति चेन्न· अलंकारपदेन तद्योग्यताया विवक्षितत्वात्· नचैवं रसादिध्वनावप्यलंकारध्वनित्वप्रसंगः। सं
लक्ष्यक्रमस्यैव तादृशस्य तथाभिप्रेतत्वात्· वस्तुतस्तु प्राधान्याप्राधान्ये व्यंग्यस्य वाच्यापेक्षयैव न तु रसापेक्ष[redacted]यापि
तदपेक्षया सर्वत्र गुणीभावात्· तथाचोपमादीनां रसांगतया[redacted]लंकारत्वं· वाच्यापेक्षयाप्राधान्यं चेति न दोषलेशाव
काशः। वस्तुमात्रं यथा· पथिअ ण एत्थ सत्थरमत्थि मणं पत्थरत्थले गामे· उण्णअ पओहरं पेक्खिऊण जइ वससि ता वस

शिवः
४१

मुः अत्र यद्युपभोगक्षमोऽसि तदास्स्वेति व्यज्यते। तच्च पओहरेति शब्दशक्तिमूलमिति। तथा। शनिरशनिश्च तमुच्चैर्निहंति कुप्यसि नरेंद्र यस्मै त्वं
यस्मै प्रसीदसि पुनः स भात्युदारोऽनुदारश्च। अत्र प्रथमार्द्धे शनिरशनिश्चेत्यनेन विरुद्धावपि त्वदनुवर्त्तनार्थमेकं कार्यं कुरुत इति वस्तु
व्यज्यते न तु विरोधालंकारः। शनिरशनिरित्यनयोः सामानाधिकरण्याभावात्। विरोधस्य च तत्रैव विश्रांतेः। द्वितीयार्द्धे तु नोदा
हरणं। तत्र चशब्दस्य अप्यर्थत्वे विरोधस्य वाच्यत्वात्। समुच्चयमात्रार्थत्वे विरोधस्यैव व्यंग्यत्वादिति। अर्थशक्तिमूलानुरण
नरूपव्यंग्यं विभजते। अर्थशक्त्युद्भवे (ध्वनौ) ऽप्यर्थो व्यंजकः संभवी स्वतः। प्रौढोक्तिमात्रात्सिद्धो वा कवेस्तेनोंभितस्य वा। वस्तु वालं
कृतिर्वेति षड्भेदोऽसौ व्यनक्ति यत्। वस्त्वलंकारमथवा तेनायं द्वादशात्मकः। स्वतः संभवी न केवलं भणितिनिष्पन्नशरीरः अ
पि तु बहिरप्यौचित्येन संभाव्यमानः। प्रौढोक्तिमात्रात्सिद्धः बहिरसन्नपि वक्तृप्रतिभामात्रेण तथा नि[redacted]
[redacted]र्मितः। अयमर्थः। व्यंजकोऽर्थस्त्रिधा। स्वतः संभवी। कविप्रौढोक्तिमात्रसिद्धः। कवि

प्रौढोक्तिमात्रसिद्धश्च निबद्धनायकादिवक्तृप्रौढोक्तिमात्रसिद्धश्च · स त्रिविधोऽपि वस्तुमात्रमलंकृतिर्वेति षड्विधो व्यंजकः । एषां व्यंग्यमपि प्र
सेकं वस्तु वालंकृतिर्वेति द्वादश भेदा भवंति · तत्र स्वतःसंभविन्यर्थे व्यंजकत्वेन वस्तुना वस्तुनो व्यक्तिर्यथा · अलससिरमणिधु
त्ताणं अग्गिमो पुत्ति धणसमिद्धिमओ · इअ भणिएण णअंगी प्पफुल्लविलोअणा जाआ · अलसत्वेनान्यत्र गंतुमनिच्छुः । धूर्त्तेषु
नरतेधनाढ्यतमगुणः । धनसमृद्धिमत्तयारूपाणाइति निर्धार्य यत्प्रफुल्लनयनत्वं वस्तु तेनान्यासामनाकर्षणीय इति ममैवोपभोग्य
म इति वस्तु व्यज्यते · वस्तुनालंकारस्य यथा · धन्यासि या कथयसि प्रियसंगमेऽपि विस्रब्धचाटुकशतानि रतान्तरेषु · नीवीं प्रति प्र
णिहिते तु करे प्रियेण सख्यः शपामि यदि किंचिदपि स्मरामि · अत्र वाच्येन वस्तुना त्वमधन्या अहं तु धन्येति स्वस्य व्यतिरेकोऽलं
कारो व्यज्यते · ननु व्यंजको धन्यासीति तत्सदृशस्य व्यतिरेक एव · न तत्परं वस्तु व्यंजकोदाहरणमेतदिति चेन्न · संबोध्यव्यतिरेक
स्तावन्न वाच्यः । आत्मनि कथनाभावस्याशक्यत्वात् · व्यंग्यस्तु यद्यपि नवत्येव तथापि तमनपेक्ष्यैव वाच्येन वस्तुमात्रेण यथोक्त

व्यतिरेकव्यंजनादिति· अलंकारेण वस्तुनो यथा· दर्पांधगंधगजकुंभकपाटकूटसंक्रान्तिनिघ्नघनशोणितशोणशोचिः। वीरैर्व्यलोकि
युधि कोपकषायकान्तिः कालीकटाक्ष इव वयस्यकरे कृपाणः। अत्र कालीकटाक्ष इव कृपाणो व्यलोकीति उपमानपुनरुक्तेक्षा· सं
भावनाविरहात्· तथा च सकलरिपुक्षयः क्षणात्करिष्यत इति वस्तु प्रकाश्यते· अलंकारेणालंकृतेर्यथा· गाढकान्तदशनक्षतव्य
था संकटादरिवधूजनस्य यः। ओष्ठविद्रुमदलान्यमोचयन्स्संदशन्युधि रुषा निजाधरं· अत्र निजाधरदशनवैरिवधूजनो
ष्ठदशनव्यथामोचनयोः कारणकार्ययोः पौर्वापर्यभावलक्षणया अतिशयोक्त्या अलंकारेण दशनसमकालमेव शत्रुयो
व्यापादिता इति समुच्चयो सोसत्त्वन्यो युगपद्या गुणक्रियाद्युक्तलक्षणः समुच्चयालंकारो द्योत्यते· एवम् एव च तुल्यकालं योगिनेति
बुससातुल्ययोगिनेति केश्चिदुच्यते· मम क्षत्याप्यन्यस्य क्षतिर्निवर्तता मितिबुद्धेरुत्प्रेक्षणादुत्प्रेक्षाप्यत्र व्यंग्या· एषु व्यंजकोऽर्थः स्वत
ःसंभवी· कविप्रौढोक्तिसिद्धव्यंजकेऽर्थे भेदचतुष्टये वस्तुना वस्तुनो व्यक्तिर्यथा· कैलासस्य प्रथमशिखरे वेणुसंमूर्छनाभिः श्रुत्वा कीर्ति

प्रदीपः
४२

विबुधरमणीगीयमानां यदीयां· स्वस्तापांगाः सरसबिसिनीकांडसंजातशंकाद्दिग्नागाः श्रवणपुलिने हस्तमावर्त्तयंति· अत्र यद्यपि बिसि
नीकांडसंजातशंकाइति भ्रांतिमान्ससंदेहो वालंकारो व्यंजकइति वस्तुमात्रं व्यंजकोदाहरणत्वमयुक्तं· तथापि तन्नागनैरपेक्ष्येण पि किं
चिच्चुलुकं कर्णप्रविशतीत्येतावतापि वस्तुमात्रे [redacted] णयेषामप्यर्थाधिगमो नास्ति तेषामप्येवंश्वैत्यमन्वर्त्तत्वादि
बुद्धिजननेन त्वत्कीर्त्तिश्रमत्करोतीति व्यक्तिसंभवाद्वस्तुमात्रोदाहरणत्वमुक्तं· अत्र च कीर्त्तिश्रवणानंतरं कर्णे हस्तावर्त्तनं हस्ति
नो न स्वतःसंभवि किं तु कविसंप्रदायात्कविना वर्णितमिति कविप्रौढोक्तिसिद्धत्वं· एवमग्रेपि द्रष्टव्यं· अत्रैव वस्तुनाऽलंका
रस्य यथा· केसेसु बलामोडिअ तेण समरम्मि जअसिरी गहिआ· जह कंदराहि विहुरा तस्स दिढं कंठअम्मि संठविआ· अत्र ते
न तथा समरे केशेषु जयश्रीर्गृहीता यथा तस्यारयः कंदराभिः कंठेस्थापिताइति वस्तुना एकत्रैव संग्रामे विजयदर्शनात्तस्या
रयः पलाय्य गुहासु तिष्ठंतीति काव्यलिंगं· न पलाय्य गतास्तद्वैरिणोपि तु ततः पराभवं संभाव्य कंदरा एव न तांस्त्यजंतीत्यपह्नुति

शिवः
४२

श्च व्यज्यते· यत्तु केशग्रहावलोकनोद्दीपितमदनाश्च कंदरास्तद्विधुरान्कंठग्रहं कुर्वन्तीत्युत्प्रेक्षा व्यज्यत इति· तन्नैवं देवं· यदि पूर्वकं दराद्दीनां
नायिकात्वाद्यारोपः स्यात्· अन्यथा केशग्रहणस्य मदनोद्दीपकत्वायोगात्· तदभ्युपगमे च न वस्तुमात्रस्य व्यंजकत्वं किं तु समासोक्ते
रलंकारस्य· अत्रैवालंकारेण वस्तुनो यथा· गाढालिंगणरहसुज्जुअम्मि दइए लहुं समोसरइ· माणंसिणीए माणो पीलणभीअ
व्व हिअआइं· अत्र पीडनभीत इवेत्युत्प्रेक्षारूपालंकारेण प्रत्यालिंगनादि तत्र जन्यत इति वस्तु ध्वन्यते· अत्रैवालंकारेणालं
कारस्य यथा· जाठरं व हसंती कइवअणंबुरुहबद्धविणिवेसा· दावेइ भुअणमंडलमण्णं विअ जअइ सा वाणी· अत्र यास्य विर
मिव हसंतीत्युत्प्रेक्षालंकारेण चमत्कारैककारणं नवं नवं जगदजडासनस्था निर्मिमीत इति वाण्या ब्रह्मणो व्यतिरेकः प्रका
श्यते यदुत्प्रेक्षां विनापि व्यतिरेकोयं प्रकाश्यते नियतिकृतनियमरहितादिवत्· तथा न स्फुटो भवतीति· यद्वा· तावन्मात्रस्य व्यंज
कत्वेप्युत्प्रेक्षाव्यंजकत्वं न विहन्यत इति· कविनिबद्धवक्तृप्रौढोक्तिमात्रसिद्धव्यंजकार्थस्य ध्वनेर्भेदचतुष्टयं वस्तुना वस्तु

नोध्यक्तिर्यथा·जेलंकागिरिमेहलासुखलिदासंभोअखिन्नोरईफारफुल्लफणावलीकवलणेपत्ताद्दरिद्दत्तणं·तेएह्लिंमलआणिला
विरहिणीणीसाससंपक्किणोजादाझत्तिसिसुत्तणेविबहलातारुस्सपुस्सा[redacted]विअ·अत्रयथोक्तेनवस्तुनानिश्वासेनप्राप्तै
श्वर्याःकिंकिंनकुर्वतीतिवस्तुव्यज्यते·तारुस्सपुस्साविअेत्यस्यव्यक्तावनुपयोगात्·नचैवमस्याप्रयोजकत्वं·उक्तिविशेषपरि
पोषकत्वात्·निश्वाससंपर्कस्यबहलत्वहेतोरुपादानात्काव्यलिंगस्यैवव्यंजकत्वेतिचेन्न·तस्यहेतुत्वाविवक्षणात्तथानु
[redacted]वक्तेः।तत्रैववस्तुनालंकारस्ययथा·सहिविराइऊणमाणस्समज्झधीरत्तणेणआसासं·पिअदंसणाविलत्तण
खणम्मिसहसत्तितेणओसरिअं·अत्रप्रियदर्शनविकलत्वक्षणेधीरत्वेनापहृतमितिवस्तु·अकृतेपिप्रार्थनेसाप्रस
न्नेतिविभावना·त्वंप्रियदर्शनसौभाग्यबलंधैर्येणसोढुंनशक्यतइतिउत्प्रेक्षाचव्यज्यते·अत्रैवालंकारेणवस्तुनो
यथा·उल्लोल्लकरअरअणक्खएहिंतुहलोअणेसुमहदिन्नं·रत्तंसुअंपसाओकोवेणपुणोइमेणअक्कमिआ·अत्र

किमितिकुपितेलोचनेवहसीतिप्रश्नोत्तरादुत्तरालंकारेण कोवेणाइमेअक्कमिआइत्यपह्नुत्यलंकारसहितेन न केवलमार्द्रक्षताग्निगोप
यसिअपितुतेषामहंप्रसादपात्रंजातेतिवस्तुव्यज्यते· अत्रैवालंकारेणालंकारस्य यथा· महिलासहस्सभरिए हिअए सुहअ सा
अमाअंती· दिअहं अणण्णकम्मा अंगं तणुअंपि तणुएइ· अत्र महिलासहस्रभरितत्वात्तव हृदिस्थानं नलभमाना ततोपि तन्वपि
तनयतीति हेत्वलंकारात्स्यात्तनोस्तनूकरणेपि तव हृदये न वर्त्तत इति विशेषोक्तिः। अत्र कविनिबद्धासखीवक्त्री· एवमर्थश
क्त्युद्भवस्य द्वादशभेदाः। शब्दार्थोभयशक्त्यैकः। यथा· अतंद्रचंद्राभरणासमुद्दीपितमन्मथा· तारकातरलाश्यामासानंदंनकरो
तिकं· अत्र श्यामारूपकामिनीविशेषरजन्योरुपमाव्यंग्या· साचातंद्रचंद्रेत्यादेः परिवृत्तसहतया समुद्दीपितेत्यादेस्तत्सह
तयाउभयस्यापिव्यंजकत्वेन शब्दार्थोभयशक्तिमूला· भेदाअष्टादशसंततत्व· अस्य ध्वनेः। ननु शब्दार्थोभयमुद्भवः। ननु रस
भावादीनां बहुत्वाद्द्वादशत्वमनुपपन्नमित्यत आह· रसादीनामनंतत्वाद्भेद एको हि गण्यते· कथमनंतत्वं· इत्थं· नवरसाः। तत्रशृं

=उभयस्यापीति· पंक्तिर्भाणेसादेपरिवृत्तसहसस्यरप ओरचाप्यस्योरेव व्यंग्यव्यंजकत्वं नेतरेषां पर्यायिकयामादिमपदानां परिवृत्तिसहत्वाभिति नोभयशक्तिमूलत्वं· एवं च प्राधान्येन विवक्षितव्यंग्योपयोगिपदानां परिवृत्तिसह—
=त्वासहत्वाभ्यामर्थशब्दयोः प्राधान्यमिति फलितं· अतंद्रसादौ तु सर्वेदेव … साधारणधर्मे रूपमायाः कवितात्पर्यविषयत्वात्सर्वेषां व्यंजकत्वमतंद्रचंद्रतारकाद्यपामापदानां परिवृत्तसहत्वं आभरणादिपदानां चतत्सहत्वं· र—

गारस्यद्वौभेदौ· संभोगोविप्रलंभश्च· तत्रसंभोगस्यापिपरस्परालिंगनादयोबहवोभेदाः। विप्रलंभस्याभिलाषादयउक्ताः। तयोरपिविभा
वानुभावव्यभिचारिवैचित्र्यं· तत्रापिनायिकानायकयोरुत्तममध्यमाधमप्रकृतित्वं· तत्रापिदेशकालावस्थाभेदइत्येकस्यैवरसस्या
नंत्यं· कागणनासर्वेषां· कुतस्तर्हिव्यंजकत्वेनगणनं· असंलक्ष्यक्रमत्वरूपमेकंसामान्यमाश्रित्य· वाक्येधुत्थः। शब्दार्थोभयशक्ति
मूलोध्वनिर्वाक्यएव· ननुनायंनियमः। शिशुपालवधेतदुक्तौप्रबंधेपिदर्शनादितिचेन्न· तत्रोभयशक्तिमूलत्वेपिध्वनित्वाभावात्
तुल्यप्राधान्यभावाद्यालक्षणातिक्रमत्यागइतिवत्· अन्यत्राप्येवंसंभाव्यतइतिचेत्संभाव्यतांनतूक्तापिनिश्चीयतेयेनतदादायवि
भागःस्यादिति· पदेप्यन्ये· अन्येसप्तदशध्वनिभेदावाक्येपदेपि· ननुपदस्यव्यंजकत्वेकिमायातंवाक्यरूपस्यकाव्यस्यध्वनित्वेक
थंवापदमात्रस्यव्यंजकत्वेवाक्यस्यैवसमस्तस्यचारुतेतिचेत्· उच्यते· पदप्रकाश्यत्वंनपदमात्रस्यव्यंजकतयाकिंतुतस्यप्रा
धान्येन· अविवक्षितवाच्येपदमात्रस्यव्यंजकत्वेपियद्वाक्यवाच्येशब्दस्यार्थस्यवाक्यस्याप्यतिशयितार्थव्यंजकत्वंतद्वाक्यस्यैवध्व

नित्यमित्यभ्युपगमान्नैकश्चिद्दोषः। एकदेशस्थितेनच तादृशपदेन समस्तमेववाक्यं चारुतामुपगच्छतीति कामिनीवैकावयव
स्थितेनभूषणेन· तदुक्तं ध्वनिकृता· एकावयवसंस्थेनभूषणेनेवकामिनी· पदद्योत्येनसुकवेर्ध्वनिनाभारतीति· तत्रवाक्यव्यंग्य
मुदाहृतं· पदव्यंग्यमुदाह्रियते· तत्राविवक्षितवाच्यस्यद्वयोरर्थान्तरसंक्रमितवाच्यंयथा· यस्यमित्राणिमित्राणिशत्रवःश
त्रवस्तथा· अनुकंप्योऽनुकंप्यश्चसजातःसचजीवति· अत्रद्वितीयोमित्रशब्द आप्तत्वे· शत्रुशब्दोनियंत्रणत्वे· अनुकं
प्यशब्दःस्नेहपात्रत्वे संक्रमितवाच्यः। नायकस्यदृढप्रकृतित्वंव्यंग्यं· ननुत्वामस्मिवच्मीतिवाक्यप्रकाशेपूर्वमेवोदाहृतं· तस्मा
दस्यपदप्रकाश्यस्यकोभेदः इतिचेन्न· अनवबोधात्· तद्धिमत्येकपदव्यंग्यभिन्नंसमस्तपदवाक्यव्यंग्यं तस्मादत्रसर्वथा
सावधानेनभाव्यमित्येवंरूपंयत्तत्परं· इदंतुकेवलमित्रादिपदव्यंग्याभिप्रायमिति· अत्यन्ततिरस्कृतवाच्यंयथा· खजनव्यव
हारादीसंततिदारुणाजहविततविधीराणं· हिअअवअस्सबहुमआणाणुहवसाआविडुअंति· अत्रविमोहेनामत्रनिर्लक्ष

तेनचवाक्यस्यकथमपिप्रवेशः। इष्टकार्यकारित्वंव्यंग्यं· यद्यपिव्यवसायेविमोहाभावोनान्वयायोग्यइतिकुतोलक्षणा· तथापिधीरा
णामधीरेभ्योवैलक्षण्यंप्रतिपाद्यं· नचतल्लक्षणांविनासंभवति· अधीरव्यवसायेपिमोहाभावादित्यवश्यंलक्षणाङ्गीकार्या· अ
लक्ष्यक्रमव्यंग्यंयथा· लावण्यंतदसौकांतिस्तद्रूपंसवचःक्रमः। तदासुधास्पदमभूदधुनातुज्वरोमहान्· अवयवस्यसं
स्थानसौष्ठवंरूपं· अवयविनस्तदेवलावण्यं· कांतिरुज्वलता· अत्रविप्रलंभार्थवाक्येऽनुभवैकगोचरमर्थंप्रकाशयतांतस
दादीनांप्राधान्यं· एवमन्येपि· नकेवलंसर्वनामपदानामेवरसादिव्यंजकता· किंत्वन्येषामपि· यथा· मुग्धेमुग्धतयैवनेतु
मखिलःकालः किमारभ्यतेमानंधत्स्वधृतिंबधानऋजुतांदूरेकुरुप्रेयसि· सख्यैवंप्रतिबोधिताप्रतिवचस्तामाहभी
ताननानीचैःशंसहृदिस्थितोहिननुमेप्राणेश्वरःश्रोष्यति· अत्रभीताननेतिपदंनीचैःशंसनविधानस्यायोग्यतांप्रकाश
यत्प्राधान्येनरसातिशयंव्यंजयति· भावादीनांतुवाक्येपिनताद्दशंचारुत्वंपदप्रकाश्यत्वेसुतरां· अतस्तत्रनोदाह्रियं

ते· लक्ष्यक्रमव्यंग्यप्रभेदेषु शब्दशक्तिमूले अलंकारव्यक्तिर्यथा· रुधिरविसरप्रसाधितकरालकरवालरुचिरभुजपरिघः झटि
ति भ्रुकुटिविटंकितललाटपट्टो विभासि नृपभीमः। अत्र भीमेति भीषणीयार्थेन नृपसंबोधनेन भीमसेनोपमा व्यज्यते·
अत्रैव वस्तुनो व्यक्तिर्यथा· भुक्तिमुक्तिकृदेकान्तसमादेशनतत्परः। कस्य नानन्दनिस्यन्दं विदधाति सदागमः। काचित्सं
केतदायिनमेवं मुख्यया वृत्त्याशंसति· तत्र सदागमपदेन स्तुतिर्व्यज्यते· उभयोश्चैतयोः शब्दप्राधान्यं· परिवृत्तसहत्वा
त्· अर्थशक्त्युद्भवेषु स्वतःसंभविन्यर्थे व्यंजके वस्तुना वस्तुनो व्यक्तिर्यथा· सायंस्नानमुपासितं मलयजेनाङ्गं समा
लेपितं यातोऽस्ताचलमौलिमम्बरमणिर्विश्रब्धमत्रागतिः। आश्चर्यं तव सौकुमार्यमभितः क्लान्तासि येनाधुना नेत्रद्वं
द्वममीलनव्यतिकरं शक्नोति ते नासितुं· अत्र न तव सौकुमार्यमाश्चर्यं येनाधुना क्लान्तासी वस्तुना कृतपरपुरुषपरि
चया क्लान्तासीति वस्तु अधुनापदप्राधान्येन व्यज्यते· वस्तुनालंकृतेर्यथा· तदप्राप्तिमहादुःखविलीनाशेषपातका· त

[redacted] च्चिंता विपुलाह्लादक्षीणपुण्यचया तथा· चिंतयंती जगत्सूतिं परब्रह्मस्वरूपिणं· निरुच्छ्वा
सतया मुक्तिं गतान्या गोपकन्यका· युग्मकं· अत्र जन्मसहस्रैरुपभोग्यानि दुष्कृतसुकृतयोः फलानि वियोगदुःखचिंताह्लादाभ्यां क
याप्यनुभूतानीत्युक्तं· एवं च दुःकृतसुकृतफलराशितादात्म्येनाध्यवसितौ भगवद्वियोगदुःखचिंताह्लादौ प्रतीयेते इति [redacted] नि
गीर्याध्यवसानरूपातिशयोक्तिद्वयमशेषचयपदाभ्यां द्योत्यते· अलंकारेण वस्तुनो यथा· क्षणदासाक्षणदा वनमवनं व्य
सनमव्यसनं· बतवीर तव द्विषतां पराङ्मुखे त्वयि पराङ्मुखं सर्वं· अत्र पराङ्मुखे त्वयि पराङ्मुखं सर्वमित्यर्थांतरन्यासे
न विधिरपि त्वामनुवर्त्तत इति सर्वपदप्राधान्येन व्यज्यते· ननु नायमर्थांतरन्यासः वनं रक्षकमित्यादेर्वाच्यस्यार्थस्यानु
॥ पपादकत्वादिति चेन्न· शब्दशक्त्याव्यंग्यस्य क्षणदाक्षणदाभिन्नेति विरोधस्योपपादकत्वेन तथात्वात्· अलंकारेण
लंकारस्य यथा· बुब्बुवक्कुहस्तगोसम्मिआसिअ रुरोमिल्लाणकमलदलो· इअ एव व कुआसोऊण कुणइ वअणं महि

समुद्रं· अत्राधरो म्लानकमलदलमिति रूपकेणालंकारेण त्वयास्य मुकुमुकुच्चुंबनं कृतं तेन तस्य म्लानत्वमिति काव्यलिंगं स्फुरणास्य च अध
कमलदलपदप्राधान्येन द्योत्यते· अथ कविप्रौढोक्तिमात्रनिष्पन्नशरीरे व्यंजकार्थे वस्तुना वस्तुव्यक्तिर्यथा· राईसु चंददधवलासु
ललिअमप्फालिऊण जो चावं· एकच्छत्तं विअ कुणइ त्तिहुअणरज्जं विअंभंतो· अत्र वस्तुना येषामसौ स्मरो राजा तेषु मध्ये
न कश्चिदपि तदादेशपराङ्मुख इति जायाभिरुपभोगपरैर्निशा तिवाह्यत इति वस्तु त्रिभुवनराज्यपदेन प्राधान्येन व्यज्यते·
अखंडाज्ञाविषयोत्तिराज्यं· इवार्थो न व्यंजनोपयोगी· अस्तु नन्तस्मिरिसागे ऽतिशयो गम्यते· वस्तुनालंकृतेर्यथा· निशितशर
धियार्पयत्यनंगो दृशि सुदृशः स्वबलं वयस्यराले· दिशि निपतति सा च वक्त्रतत्र व्यतिकरमेत्य समुन्मिषंत्यवस्थाः॥ अ
त्र व्यतिकरमेत्य सावस्थाः समुन्मिषंतीति वस्तुना परस्परविरुद्धा अपि निर्वेदोन्मादादयो ऽवस्था भवंतीति विरोधालंका
रो व्यतिकरपदेन प्राधान्येन व्यज्यते· अलंकारेण वस्तुनो यथा· वारिज्जंतो वि पुणो संदावकअत्थिएण हिअएण· थ

= अत्र विरोधव्यंजने व्यतिकरपदस्य संपर्कबोधकस्य प्राधान्यं· न च रागनिरागनिरासादिवत्सामानाधिकरण्याभावे कथं विरोधालंकार इति वाच्यं· नत्रेसुपान्ते एकत्र धर्मिण्येवकारितं हसितमिसाधवस्यात्रतिसामानाधिकरण्यस्य स्फुटं प्रतीतेः॥ नत्व [illegible]

=विषयसंगापकारर्थितेनाहृदयेनश्वासाधिकालमेणयमानोहावोवार्यमाणमृवेमिगम्भोटसेसानताथामहेतापिसानगासमोहार्दनविशुद्धजातित्वान्नचलनीत्यर्थः॥१२॥ स्कंधः॥सेनापिवेशेपिवलंसैन्यमपि॥१॥=

एतरवअस्सएएं विसुद्धजाईएवलइसे हारो॥ अत्रस्तनभारवयस्येत्न विशुद्धजातित्वाद्धारोनचलतीतिहेत्वलंकारेण
अनवरतंकंपमानएवहारोस्तीतिवस्तुनचलतीतिपदेनव्यज्यते॥ अलंकारेणालंकारस्यथा॥ सोमुद्धसामलंगोध
म्मियेलाकलिअललिअणिअदेहो॥ तीएखंधाहिवलंगदिअसरोमुरअसंगरेजअति॥ अत्रसुरतसंगरे धम्मिलःस्मर
इतिरूपकालंकाराभ्यां तथाकेशपाशःस्कंधेपतितोयथारतिविरतावनिरुच्चेष्टः कामुकोभूदिति विभावनास्कंधप
दप्राधान्येनव्यज्यते॥ अथकविनिबद्धवक्तृप्रौढोक्तिमात्रनिष्पन्नशरीरव्यंजकार्यध्वनिभेदेषुपदप्राधान्येनवस्तुना
[redacted]वस्तुनोव्यक्तिर्यथा॥ एवपुन्निमामिअंकस्समुहअकोतंसिमणसुमहसवं॥ कासोहग्गासमग्गपओसरअणि
स्सतुरलम्मि॥ अत्रयथोक्तेनवस्तुनाअन्यसामपिप्रथमममनुरक्तस्त्वमभर्ततत इतिवस्तुएवपुन्निमामिअंकपओ
सरअणीपदप्राधान्येनद्योत्यते॥ अत्रपदेरजनीवेस्युपमानेरपेक्ष्यएकथंव्यंजकत्वमितिचेत्स॥ अत्रैववस्तुनाअलंका | शिवः

=प्रकृतिःप्रदोषरजनीपदे॥ अत्रप्रदोषरजन्याःकेसेतावतापियंजनसंभवाद्वस्तुमात्रव्यंजकतारातत्रएवंस्तावभिमतमितिभाति॥=

रस्य यथा॰ सहि णवणिहुवणसमरम्मि अंकवालीसहीए णिविडाए॰ हारो णिवारिओ व्विअ उव्वेरंतो तदो कहं रमिअं॰ अत्र निधुवनस
मर इति रूपकस्य व्यंजनायामप्रयोजकतया वाच्येन वस्तुमात्रेण हारच्छेदानंतरं भोगं गमनारता छिलक्षणं नवोढया स्वैरतमप्र
न्त्कथय कीदृगिति व्यतिरेकालंकारः कथं पदप्रकाश्यः॰ अलंकारेण वस्तुनो यथा॰ पविसंती घरवारं विवलिअवअणा
पलोइऊण पहं॰ खंधाघेत्तूण घडं हाहा णट्ठो त्ति रुअसि सहि किं ति॰ अत्र नष्ट इति रोदिषीति हेत्वलंकारेण संकेतस्थानिकेतनं ग
च्छंतं कामुकं दृष्ट्वाय दिनं तु मिच्छसि तत्परं घटं गृहीत्वा गच्छेति वस्तु किं तिपदप्राधान्येन प्रकाश्यते॰ यथावा॰ विहलंखलं
तुमं सहि दट्ठूण कुडेण तरलतरदिट्ठिं॰ वारप्फंसमिसेण अप्पा गरुओ त्ति पाडिअ विहिण्णो॰ अत्र नदीकूले लतागहने कृतसं
केतमप्राप्तं गृहप्रवेशसमये पश्चादागच्छंतं कामुकं दृष्ट्वा पुनर्नदीगमनाय बुद्धिपूर्वं द्वारस्पर्शव्याजेन त्वया घटः स्फोटित इति म
यावगतं तत्समाश्वासं विधाय समीहितसिद्धये अहं तव वश्यस्थ निकटे सर्वसमर्थयिष्ये इति वस्तु द्वारस्पर्शमिषेण सप्रकुला

वारं फंसमिसे सोत्तिपदेन द्योत्यते· अलंकारेणालंकारस्य यथा· जोण्हाए महुरसेण अ विइण्णतारुण्णउस्सुअमणा सा· वुड्ढा वि णवोढव्व परव
हुआ अहह हरइ तुह हिअअं· अत्र परवधूत्वेन ज्ञातवहृदयं हरतीति काव्यलिंगालंकारेण अस्मानुज्झित्वा त्वं परवधूमभिलषसीति त्वद्दु
श्चरितं वक्तुं न शक्यत इति आक्षेपालंकारः प्राधान्येन परवधूपदद्योत्यः प्रकाश्यते· शब्दार्थोभयशक्तिमूलस्तु पदप्रकाश्यो न भवति·
तत्र वाक्यस्यैव प्राधान्यात्· एवं पञ्चत्रिंशद्भेदाः प्रबन्धेप्यर्थशक्तिमूलः अर्थमूलः पदवाक्ययोः प्रबन्धे च· तत्र प्रबन्धश्च संघटितना
नावाक्यसमुदायः। स च ग्रन्थरूपस्तदवान्तरप्रकरणरूपश्चेति· तत्र पदवाक्ययोरुदाहृतं· प्रबन्धे यथा गृध्रगोमायुसंवादादौ·
तथा हि· अलं स्थित्वा श्मशानेऽस्मिन् गृध्रगोमायुसंकुले· कंकालबहुले घोरे सर्वप्राणिभयंकरे· न चेह जीवितः कश्चित्कालधर्म
मुपेयिवान्· प्रियो वा यदि वा द्वेष्यः प्राणिनां गतिरीदृशी· इति दिवा प्रागल्भ्यवतो गृध्रस्य मृतावलकपुरुषविसर्जनपरं वाक्यमे
कलं· आदित्योयं स्थितो मूढाः स्नेहं कुरुत सांप्रतं· बहुविघ्नो मुहूर्तोयं जीवेदपि कदाचन· अमुं कनकवर्णाभं बालमप्राप्तयौवनं·

गृभयाधात्कथं मृगस्य जन्मविशंकिताः। इति निशि प्रगल्भस्य गोमायोस्तृष्णावर्त्तनपरं श्लोकद्वयमिति प्रबंध एव व्यंजकः। अथ
ते। अत्र स्वतः संभविना वस्तुना गमननिवर्त्तनरूपवस्तुव्यक्तिः। एवमन्येष्वेकादशभेदाद्युदाहार्याः। पदैकदेशरचनावर्णेष्वपि रसादयः
। रसादयो ऽलक्ष्यक्रमाः पदैकदेशे रचनायां वर्णेषु अपि शब्दात्प्रबंधे पदे वाक्ययोस्तु पदेष्वन्य इत्यनेनैव प्रतिपादिताः। पदं ताव
द्विविधं सुबंतं तिङंतं च। तदेकदेशो नाम धातुस्वरूपप्रकृतिभागः प्रकृत्येकदेशाः। सुप्तिङ्रूपविभक्ति भागश्च। उपसर्गादि
रूपश्च। तत्र पदवाक्ययोरुदाहृतं प्राक्। पदैकदेशादिषूदाह्रियते। तत्र धातुरूपप्रकृत्यात्मकपदैकदेशे रसादिव्यक्तिर्यथा। र
इकेलिहिअणिअंसणकरकिसलअरुद्धणअणजुअलस्स। रुद्दस्स तइअणअणं पव्वइपरिचुंबिअं जअइ। अत्र रति
व्यक्तौ जि धातुरूपप्रकृतेः प्राधान्यं। यतः स्थगनव्यापारसाम्येप्यन्यनेत्रयोः कराभ्यां पिधानमस्य तु लोकोत्तरेण कर्मणेति
तदेवोत्कृष्टं धन्यजीवितमिति रत्युत्कर्षप्रयोजकमनया व्यज्यते। अत एव जयतीत्युक्तं न तु शोभत इत्यादि। एवमन्येपि प्रकृत्याद्

प्रदीपः ५० 50 ःरसादिव्यंजनेप्राधान्यंतत्तदर्थव्यंजकतयावगंतव्यं·नामरूपतदेकदेशेतद्व्यक्तिर्यथा·प्रेयान्सोयमपाकृतःसशपथंपादानतःकां
तयाद्वित्राण्येवपदानिवासभवनाद्यावन्नयात्युन्मनाः।तावत्प्रच्युतपाणिसंपुटलसन्नीवीनिबंधोद्धतोधाविल्यैवकृतप्रणाम
कमहोप्रेम्णोविचित्रागतिः।अत्रद्वारादिपदंपरिहृत्यपदानीत्युक्तं·तेनद्वारपर्यंतगमनेप्यसहिष्णुतयाउत्कंठातिशयोव्यज्य
ते·तिङ्सुपोर्यथा·पथिपथिशुकचंचूचारुरामांकुराणांदिशिदिशिपवमानोवीरुधांलासकश्च·नरिकिरतिद्राक्सायकान्पु
ष्पधन्वापुरिपुरिविनिवृत्तामानिनीमानचर्चा·अत्रकिरतीतितिङाकिरणस्यसाध्यता·तिङ्योगेसाध्यतयैवधात्वर्थोप
स्थितेःसिद्धता·सुप्प्रयोगेतथैवप्रकृत्यर्थप्रतीतेः।तत्रापिक्तप्रत्ययेनातीतताप्रकाश्यतइतिकिरणनिरासःपौर्वापर्यविपर्य
यरूपातिशयोक्तिप्रकाशोरसोत्कर्षेपर्यवस्यति·यत्तुलटासाध्यत्वंक्तप्रत्ययेनातीतत्वमितिव्याख्यानंतदयुक्तं·सुप्तिङ्भ्यां
सिद्धत्वसाध्यत्वमभिधायतत्रापिक्तप्रत्ययेनातीतत्वमित्यनेनवृत्तिव्याख्यानेनविरोधात्·अथसुप्तिङ्विशेषेसुप्यथा·लि शिवः ५०

खन्नास्तेन मिं बहिरवहितः प्राणदयितो निराहाराः सरवः सततरुदितोच्छूननयनाः परित्यक्तं सर्वं हसितपठितं पंजरशुकैस्तवावस्था
चेयं विसृज कठिने मानमधुना॰ अत्र लिखन्निसुक्तं न तु लिखतीति॰ तेन लिखनस्याप्राधान्यमबुद्धिपूर्वकत्वरूपं॰ आस्तेइत्युक्तं
नत्वासीदिति॰ न्नेनयथावस्थानस्य प्रसादपर्यन्तताविद्धि न्नत्वाव्यज्यते॰ यद्यपि शान्तप्रत्ययः सुपः प्रकृतिरेव तथापि तिङन्तत्व
द्विकृतितया तिङन्तेवोदाहृतः॥ भ्रमिमिन्नुक्तं न भ्रमावितिः॰ तेन बुद्धिपूर्वकं भ्रमौन किंचिल्लिखन शक्तिसुक्तिनत्याव्यज्यते॰
गामारिअलिगामे वसामि णअरहिइं णआलमि॰ णअरिआतंयइ णेहरेमिजाहो मिसाहोमि॰ अत्र नागरिकाणामिति
षष्ठ्यापतिपदार्थेताद्दृशकलाभिज्ञतादिरूपप्रकर्षः प्रकाश्यते॰ रमणीयः क्षत्रियकुमार आसीदित्यत्र तु अतीतकालवि
हितेनाचिरं तदीयहिंसायाः सुकरत्वं व्यंजयता प्राधान्येन धर्जटिधनुर्भंगजन्मा भार्गवक्रोधः प्रकाश्यते॰ वचनविशेषो यथा॰
ताणगुणगहणाणं ताणुक्कंठाणतस्सपेमस्स॰ ताणंभणिआणंसुंदर एरिसिअंजाअमवसाणं॰ अत्र गुणग्रहणादीनां प्र

प्रदीपः
५१
51

महत्त्वंनानाप्रकारत्वेपिकार्यधर्मएकजातीयमेवनकदाचिदन्यथाभावंप्राप्तमितिबहुवचनैकवचनाभ्यांव्यज्यते·पुरुषव्यत्ययस्य
व्यंजकत्वंयथा·रेरेचंचललोचनांचितरुचेचेतःप्रमुच्यस्थिरंप्रेमाणंमहिमानमेणनयनामालोक्यकिंनृत्यसि·किंमन्येविहरिष्य
सेबतस्वांमुंचांतराशामिमामेषाकंठतटेकृताखलुमयाशिलासंसारवारांनिधौ·अत्रत्वंमन्येअहंविहरिष्यसइतिप्राप्ते
सेचमन्योपपदेमन्यतेरुत्तमएकवच्चेतिसूत्रेणयुष्मदस्मदोर्योगेउत्तममध्यमयोर्विपर्ययेणविधानंप्रहासमभिव्यन
क्ति·पूर्वनिपातादयःपदैकदेशधर्मत्वात्पदैकदेशाएवगण्यंते·पूर्वनिपातस्ययथा·येषांदोर्बलमेवदुर्बलतयातेस
म्मतास्तैरपिप्रायःकेवलनीतिरीतिशरणैःकार्यंकिमुर्वीश्वरैः।येस्माशक्रपुनःपराक्रमनयस्वीकारकांतक्रमास्तेस्यु
र्नैवनवादृशास्त्रिजगतिद्वित्राःपवित्राःपरं·अत्रचाङ्कपराक्रमनयेत्यत्रनयस्याल्पाच्तरत्वेनपूर्वनिपातमविधायप
राक्रमस्यतथाभावोऽभ्यर्हितत्वंद्योतयति·उपपदविभक्तिविशेषस्ययथा·अधनाध्वनिवीरधनुर्ध्वनिरतिविधुरेरपोषितव

शिवः
५१

दिवसं॰ दिवसेनतु नरपन्नवानसुद्धविधिसिद्धसाधुवादपदं॰ अत्र वीररसात्म निनवान्दिवसेनायुद्धेति अपवर्गे तृतीया अपवर्गश्च फल
प्राप्तौ परित्यागः। अतो नवत्सदार्थस्य युद्धरूपक्रियायायफलं विजयस्तस्याप्तिस्तृतीययाद्योत्यते॰ यत्तु युद्धविधौ सादिक्रियावि
शेषणमिति व्याख्यातवास्तच्छेदो भंगमपिनाद्राक्षीदिति। प्रत्ययरूपस्सप्रकलैकदेशस्य यथा॰ स्मेरोमृगः सविधनगरीरथ्ययाप
र्यटंतं दृष्ट्वा दृष्ट्वा नवनवल्लीतुंगवातायनस्था॰ साक्षात्कामं नवमिवरतिर्मालतीमाधवं यद्गाढोत्कंठं लुलितललितैरंगकै
स्ताम्यतीति॰ अत्रांगकैरिति कस्वरूपतद्धितेनाल्पार्थकेनानुकंपातिशयो व्यज्यते॰ उपसर्गरूपस्य तदेकदेशस्य यथा॰ परिछे
दातीतः सकलवचनानामविषयः पुनर्जन्मन्यस्मिन्ननुभवपथं यो न गतवान्॰ विवेकप्रध्वंसादुपचितमहामोहगहनो वि
कारः कोप्यंतर्जडयति च तापं च कुरुते॰ अत्र प्रध्वंसादिति प्रशब्दः प्रकृत्येकदेशः प्रकर्षद्योतकः। उपसर्गाणामवाचकत्वात्॰
निपातरूपपदैकदेशस्य यथा॰ कृतं च गर्वाभिमुखं मनस्त्वया किमन्यदेवं निहताश्च नो द्विषः। तमांसि तिष्ठंति हि तावदंशुमान्न या

प्रदीपः
५२
52

वशायासुहृद्याद्रिमौलितां· अत्र च द्वयेन मनोगर्वाभिमुखीकरणशत्रुहननयोरेककालतारूपः समुच्चयो द्योत्यते· यथ पिबेतिभिन्नमेव
पदं न तन्त्यस्यैकदेशस्तथापि केवलस्य तस्यासाधुतासदेकदेशतोपचारेणोदाहरणं· अत एव काम्बोजराजेनोपमाप्रकरणे· न
ह्रीवादेः सार्थकत्वेपि पृथक्पदतामनुशास्तीति· एतेन तिङन्तसमभिव्याहृताउपसर्गा व्याख्याताः। अथ बहूनां यथा· रामोसौ भुव
नेषु विक्रमगुणैः प्राप्तः प्रसिद्धिं परामस्मद्भाग्यविपर्ययाद्यदि परं देवो न जानाति तं· बन्दीवैष यशांसि गायति मरुद्यस्यैकबा
णाहतिश्रेणीभूतविशालतालविवरोद्गीर्णैः स्वरैः सप्तभिः। अत्रासाविति सर्वनाम्नः भुवनेष्विति न तु देशेष्विति भुवने वेति भु
वनरूपप्रातिपदिकस्य बहुवचनस्य च· विक्रमगुणैरिति न तु गुणेन शौर्येणेति प्रातिपदिकवचनयोर्व्यञ्जकत्वं· किं वास्मद्भा
ग्यस्येत्यत्र न तु भाग्येति न वा यद्भाग्येति कृतं· तेनास्मदिस्य बहुवचनसिद्धतया सर्वाक्षेपकत्वं· तथा भाग्यविपर्ययादित्यन्यथा संप
त्तिमुखेनोक्तं न तु भाग्याद्यभावमुखेन· अतस्तथा विधाने नाभाग्यविरहेपि भाग्यान्येव नादृश्यन्ते न परिणतानीति गम्यते· तत्र शिवः
५२

णिमनि कलयति कलामनुमदनधनुर्भ्रुवोः पठत्यग्रे· अधिवसति सकलललनामौलिमियं चकितहरिणीचलनयना· अत्र तरुणिमनी
तीमनिचः तरुणत्वपदेन अनुमदनधनुरित्यव्ययीभावस्य धनुःसमीप इत्यनेन मौलिमधिवसतीति कर्मभूताधारस्य मौलि
लौ वसतीत्यनेन तुल्येऽपि वाचकत्वेऽस्ति कश्चित्स्वरूपस्य विशेषो यश्चमत्कारकारी स एव व्यंजकः। अत्र त्वशब्देन प्रकृत्यर्थ
स्यैव प्रौढत्वं व्यज्यते· इमनिचा तु तद्व्यतिरेकोनवलं धनुषः समीप इत्यत्र धनुषोऽस्तंगुणीभावः अव्ययीभावे तु पूर्वपदार्थ
प्राधान्येऽपि उत्तरपदार्थस्य किंचिदेवाप्राधान्यं· कर्मभूताधारस्य भेदे तु व्याप्तिरवगम्यत इत्यवसेयं· एवमन्येषामपि बो
द्धव्यं· वर्णरचनयोर्व्यंजकत्वं गुणनिरूपणेऽदाहरिष्यते· प्रबंधे तु नाटकादौ रसादिव्यंजकत्वं द्रष्टव्यं· यत्तु पूर्वं प्रबं
धशब्देन संघटितावांतरवाक्यसमूहोऽभिहितः। इदानीं तु संघटितमहावाक्यमित्यपौनरुक्त्यमिति कश्चिदाह· तदज्ञाना
त्· पूर्वं हि अर्थशक्तिमूलमात्रस्य प्रबंधविषयत्वं· अत्र त्वसंलक्ष्यक्रमव्यंग्यस्येति पौनरुक्त्याभावात्· भेदास्तदेकपंचा

प्रदीपः।
५२
53

शात्· तथाहि· अविवक्षितवाच्यस्य द्वौ भेदौ· तौ च प्रत्येकं पदवाक्ययोरिति चत्वारः। विवक्षितान्यपरवाच्ये तु मध्ये· लक्ष्यक्रमव्यंग्यः प
दवाक्यतदेकदेशघटनावर्णप्रबंधभेदेन षड्विधः। लक्ष्यक्रमे तु शब्दशक्तिमूलस्य द्वौ भेदौ तौ च प्रत्येकं पदवाक्ययोरिति तस्य च
त्वारो भेदाः। अर्थशक्तिमूलस्य द्वादश भेदास्ते च प्रत्येकं पदवाक्यप्रबंधेष्विति षट्त्रिंशदस्य भेदाः। उभयशक्तिमूलस्तु वाक्य ए
वेति· तेषां चान्योन्ययोजनं· संकरेण त्रिरूपेण संसृष्ट्या चैकरूपया· वेदखाब्धिवियच्चंद्राः। १०४०४। अंगांगिभावेन एकव्यं
जकानुप्रवेशेन चेति त्रिविधः संकरः। उक्तप्रकारत्रयं विना संयोगः संसृष्टिः। एवमेकपंचाशल्लो भेदानामेकपंचाशता भे
दैर्योजनमिति तावता तावद्गुणेन सहस्रद्वयं एकाधिकाष्टशतीच· संयोजनं च संसृष्ट्यादिचतुःप्रकारैरिति तावतां च
तुर्भिर्गुणने· दशसहस्राणि चतुरधिकानि चत्वारिशतानि चेति संपद्यंते· न चानुग्राह्यानुग्राहकभावेन संकरस्यत्वे·तु ग्राह
कस्याङ्गतयाङ्गिभाव इति ध्वनिसंकरत्वमिति वाच्यं· तत्र हि स्वतश्चमत्कारिण एव तस्यांकिंचिदुपकारतामात्रं न तु शिवः

५२

६ शेषश्लेषिभाव एवेति । नन्वस्त्वेकपंचाशद्भेदेष्वेकतरस्य पंचाशता योजनं । स्वस्य तु कथं स्वेन योजनेति चेत् । न । व्यक्तिभेदमादाय विजा
तीयवत्सजातीयेनापि संकरस्येति सत्त्वचक्षुराशयः । अत्रार्वाचीनाः । गणनेयमयुक्ता । अग्निमाग्निमभेदस्य योजने एकैकन्यासा
त् । तथाहि । अर्थान्तरसंक्रमितवाच्यस्य असंततिरस्कृतवाच्येन योजने यो भेदः स एवासंततिरस्कृतवाच्यस्य अर्थान्तरसंक्र
मितवाच्येन योजनायां । एवमन्यत्रापि । तस्मात् । एको राशिर्द्विधा स्थाप्य एकमेवाधिकं कुरु । समार्द्धेनाऽसमो गुण्य एत
त्संकलितं लघु । इत्युक्तदिशा पंचाशद्भेदेष्वनेन षड्विंशत्या एकपंचाशतं गुणयेत् । तथा च । रसदस्राग्निमेदिन्य इति । १३२६ त्रयो
दशशतानि षड्विंशत्यधिकानि जायन्ते । योगश्चतुःप्रकार इति तेषु चतुर्भिर्गुणितेषु । वेदाभ्रदहनेषव इति । ५३०४ पंचसह
स्राणि चतुरधिकं शतत्रयं संकीर्णभेदा इत्येवज्ञाय इति वदंति । अत्र ब्रूमः । अनुभवसिद्धौ तावत् पुंड्रकादीक्षुरसेष्विव ध्व
निष्वपि हृद्यतातिशयानतिशयौ । तथा च । अर्थान्तरसंक्रमितवाच्यस्य यत्रातिशयस्तत्रात्यंततिरस्कृतवाच्येन तद्योज

नं·यत्रतुतद्वैपरीत्यंतत्रास्यंततिरस्कृतवाच्यस्येतरेणयोजनमितिव्यपदेशः॥एवमन्यत्रापूह्यं·एतदेवप्राधान्यमादायगणनासौत्री·नन्वे
वंयत्रोभयोस्तुल्यप्राधान्यमेवचारुत्वंतस्यभेदांतरत्वंस्यादितिचेत्·मैवं·अपकर्षाभावस्यातिशयपदेनविवक्षितत्वात्·तत्रोभयत्रैवस्वं
करस्वीकारात्·एतादृशेचास्यानेपद्यालंबनमात्रमेवमहत्त्वौत्सुक्यमितिसहृदयभावमास्यायालोचनीयमिति·अत्रभेदैः·सह·ए
१०४५५तेषुदिङ्मात्रमुदाह्रियते·धृणपाकुणिआदेअरजाआएस्सुरअकिंपिदेजणिद्दा·रुअइप[redacted]रिओएरवलहि
घरम्मिअणुणिज्जउवराईः·अत्रानुनयनेवाच्योऽनुनयःकिमुपभोगलक्षणेलक्ष्येसंक्रमितआहोस्विद्विवक्षितएवउपभो
गस्यव्यंजकइत्यविवक्षितवाच्यविवक्षितान्यपरवाच्ययोःसंदेहःसंकरः॥स्निग्धश्यामलकांतिलिप्तवपुषोवेल्लद्बलाका
घनावाताःशीकरिणःपयोदसुहृदामानंदकेकाःकलाः॥कामंसंतुदृढंकठोरहृदयोरामोस्मिसर्वंसहेवैदेहीतुकथं
भविष्यतिहहाहादेविधीराभव·अत्रमुख्यार्थबाधाल्लिप्तपदंसंपर्कलक्षयदतिशयंव्यनक्ति·पयोदेचाचेतनेसौहृदाभा

दुःखसहिष्णुत्वेन वाच्यस्य रामस्यैवान्वयात् =३

अत्यन्ततिरस्कृतवाच्यामांसहे =३

तद्वाइत्येविप्र लम्भेतथा

वास्तुहसदं उपकारित्वं लक्षयन्तदतिशयं प्रतिपादयति· पयोदानां मयूरनिष्ठकेकाद्युपकारशीलत्वात्· रामपदं च सर्वसहत्वाद्युपभुक्त
शक्यार्थतया सकलदुःखभाजनत्वं लक्षयत्सीतां विनाजीविष्यामीति व्यंजयदेव विप्रलंभं व्यनक्ति· तत्र लिप्तेति पयोदस्तु हृद
मित्यनयोरत्यंततिरस्कृतवाच्ययोः संसृष्टिः। ताभ्यां सह रामइत्यर्थांतरसंक्रमितवाच्यस्यानुग्राह्यानुग्राहकभावेन संकर
ः। तयोस्तु दीपकत्वात्· रामपदेन चैकव्यंजकानुप्रवेशे नार्थांतरसंक्रमितवाच्यरसध्वन्योः संकरः। रामोऽस्मीत्यनेनैव ल
क्षणामूलस्य विप्रलंभस्य च व्यंजनाद्विप्रलंभे वाक्यव्यंग्यस्य प्राधान्यात्· एवमन्यदप्युदाहार्यम्· ।। इति श्रीमहामहोपा
ध्यायश्रीगोविन्दठक्कुरकृते काव्यप्रदीपे ध्वनिभेदनिर्णयो नाम चतुर्थ उल्लासः।। ।। एवं ध्वनौ भेदप्रभेदाभ्यां निर्णीते गुणी
भूतव्यंग्यस्य भेदानाह· अगूढमपरस्यांगं वाच्यसिद्ध्यंगमस्फुटं· संदिग्धतुल्यप्राधान्ये काकाक्षिप्तमसुंदरं· व्यंग्यमेवं गुणीभू
तव्यंग्यस्याष्टौ भिदा मताः। वाच्यापेक्षया अचमत्कारकारित्वेन व्यंग्यस्य गुणीभावः। तच्चास्वत एवासुंदरत्वेनागूढत्वादिविशे

=अस्स रसंगतिं दर्शयितुमाह· एवमिति· २ = अपरांगत्वादेर्नियमेन गुणीभावप्रयोजकत्वाद्धस्यर्थमाह· वाच्यापेक्षयेति· तथा च वाच्यापतिभ्यंपितचमत्कारावेससेवमध्यमत्वं नतु रमसेकेवलापरांगत्वादिनेतिभावः। २=

=वाच्यातिशयपितस्यापरांगतायामनुभवं प्रमाणयति· एवमिति· १= वाच्यस्येति· कुतोपि वैगुण्यादविश्रांतस्य यतो विश्रांतिरित्यर्थः। अत्रांगं विधानं· २= संदिग्धेति· वाच्यकृतो व्यंग्यकृतो वा चमत्कारो यत्रेत्यर्थः। चमत्कारजननेवाच्यव्यंग्ययोर्द्वयोरविशेषमत्वेन तुल्यताबोध्या· ३=

प्रदीपः

१४२

५५ षणास्तम्भकेन वेत्यर्थः। अगूढं चासहृदयैरपि वेद्यं· तादृशं वाच्यायमानतया न तथा चमत्करोति· यथा कामिनीकुचकलशवद्गूढं· एवमपरे ष

55 पि नेदेषु अनुभवं साक्षी अपरस्यांगं· अपरस्य रसादेः स्वनैरपेक्ष्येण लब्धसिद्धेरुपकारकं· वाच्यसिध्यंगं· वाच्यसिद्धेरेव यदधीनात न

त· अस्फुटं· सहृदयानामपि दुःखसंवेद्यं· संदिग्धतुल्यप्राधान्ये इति· संदिग्धप्राधान्यं तुल्यप्राधान्यं च ══ तिद्वयमित्यर्थः। का

काक्षिप्तं· यथा काकां विना वाकार्य एव आत्मानं न लभते तथा प्रकाश्यं काकाक्षिप्तं नोपस्थापितमिति वा· असुंदरं· स्वभावादेव वा

च्यापेक्षया अचारु· तेष्वगूढं यथा· यस्यासुहृत्कृततिरस्कृतिरेत्य तप्तसूचीव्यधव्यतिकरेण युनक्ति कर्णौ· कांचीगुणग्रथ

नभाजनमेष सोस्मि जीवन्न संप्रति भवामि किमावहामि· अत्र जीवन्निव्यभिमते कार्यांश क्रांते संक्रमित वाच्यं· तस्य चमरणमेव

श्रेय इति व्यंग्यमसहृदयैरपि वाच्यवत्प्रतीयते इति गुणीभूतव्यंग्यं· उन्निद्रकोकनदरेणुपिशंगितांगा गायंति मंजु मधुपा

गृहदीर्घिकासु· एतच्चकोस्ति च रवेर्नवबंधुजीवपुष्पच्छदाभमुदयाचलचुंबिबिंबं· अत्र चुंबतेर्वक्रसंयोगे मुख्योर्थोऽचेत शिवः ५५

=वाच्यवदिति· एवं विधे येषां स्याद्प्रयोगमोदुर्यादितिभावः। २= अगूढमसंनतिरस्कृतवाच्येउदाहरणेनुन्निद्रेति· [redacted] ३=

=लक्ष्येति संयोगत्वसंसर्गेत्यर्थः॥१॥ =अरूढमर्थमाक्षिपतीत्यर्थः लाक्षणिकेति॥ अत्रासीदिति॥३॥ =केनापीत्युपेति अनिर्दिष्टविशेषेकिमः शक्त्यामेति व्यंग्यतद्भगवान्निविषयत्वाद्वाच्यायमानमिति भावः॥५॥ =यन्नक्ति इत्यस्मात् एव समत्कुवस्लगसमाधानत्वात् नयनवायमानामुत

संयोगस्य २

नेबाधित इति संयोगमात्रं लक्षयतोऽस्यासंततिरस्कृतवाच्यत्वं। अंगप्रधानभावः कालो वाच्यायमानतया गुणीभूतः। नन्वत्र लक्ष्यतावच्छेदक
स्य वक्त्रसंयोगेऽपि सत्त्वात्कथमत्यंततिरस्कृतवाच्यत्वमिति चेत्। लक्ष्यतावच्छेदकस्य सत्त्वेऽपि वाच्यस्य संयोगविशेषस्यान्वया प्रवे
शात्। अत्रासीत्फणिपाशबंधनविधिः शक्त्या भवद्देवरे गाढं वक्षसि ताडिते हनुमता द्रोणाद्रिरत्राहृतः। दिव्यैरिंद्रजिदत्र लक्ष्म
णेन शरैर्लोकांतरं लंभितः केनाप्यत्र मृगाक्षि राक्षसपतेः कृत्ता च कंठाटवी। अत्रानुनायकोपनायकप्रतिनायकेषु निर्दिष्टेषु
चतुर्थवाक्येऽनुक्तोऽपि नायको राम एवार्थशक्त्या प्रतीयते। स च केनापीत्युपादानेन वाच्यायमानतया गूढः कृतः। तस्याप्यत्रे
ति पाठे गूढतया ध्वनित्वमव्याहतमेव। अत्र श्लोके वा कामत्रेत्युपादानं प्रत्येकमेवाद्भुतत्वं व्यनक्ति। अपरस्य रसादेर्वाच्यस्य वा
प्रधानस्याङ्गं अलक्ष्यक्रमः अनुस्वानाभलक्ष्यक्रमो वेति द्विविधः। तत्र प्रथमे रसस्यांगभावेन गुणीभूतत्वं यथा। अयं स रस
नोत्कर्षी पीनस्तनविमर्दनः। नाभ्यूरुजघनस्पर्शी नीवीविस्रंसनः करः। अत्र भूरिश्रवसश्छिन्नं हस्तमासाद्य तद्वधूनां प्रला

=अयमुत्पाद्य सामर्थ्यं संगमुत्पादयतीति अपरस्ये... ति रसादीनामङ्गत्वेन उपकुर्वन्वाच्यस्येति नो॥ प्रति॥ ३=द्विविधः॥ प्रत्यानंतरं व्यंग्यार्थप्रतिबोधः प्रथमे अलक्ष्यक्रमरूपापरांगभेदे॥ २=

प्रदीपः
५६
56

अतिविस्तृताः

पेश्टृंगारःकरुणस्यांग॰निष्पन्नस्यरसस्यापरांगताभावाद्रसपदेनात्रस्थायिभावोग्रहव्यः।रसस्यैवभावांगतायथा॰कैलासालयभाल
लोचनरुचानिर्वर्तितालक्तकव्यक्तिःपादनखद्युतिर्गिरिसुतायाःसावःसदात्रायतां॰स्पर्धाबंधसमृद्धयेवसुदृढंरूढायया नेत्रयोःकां
तिःकोकनदानुकारसरसासद्यःसमुत्सार्यते॰अत्रवक्तुर्देवीविषयरतिरूपभावेदेवयोःश्टृंगारोंगं॰भावेभावस्यांगत्वंयथा॰
अत्युच्चाःपरितःस्फुरंतिगिरयःस्फारास्तथांभोधयस्तानेतानपिबिभ्रतीकिमपिनक्लांतासितुभ्यंनमः।आश्चर्येणमुहुर्मुहुःस्तु
तिमितिप्रस्तौमियावद्भुवस्तावद्बिभ्रदिमांस्मृतस्तवभुजोवाचस्ततोमुद्रिताः।अत्रभूविषयोरतिभावोराजविषयस्यरतिभावस्यां
ग॰आभासस्यांगत्वंयथा॰बंदीकृत्यनृपद्विषांमृगदृश स्ताःपश्यतांप्रेयसांश्लिष्यंतिप्रणमंतिलांतिपरितश्चुंबंतितेसैनि
काः।अस्माकंसुकृतैर्दृशोर्निपतितोस्यौचित्यवारांनिधेविध्वस्ताविपदोऽखिलास्तदितितैःप्रत्यर्थिभिःस्तूयसे॰अत्रप्रथमा
र्धेश्टृंगारोऽननुरक्तविषयतयाद्वितीयार्धेतुरतिभावःशत्रुविषयतयाआभासंतौचराजविषयरतिभावस्यांगं॰भावशांतेर्यथा॰ शिवः
५६

हृष्यन्ताः ध्या
व्य तिष्ठन्ति

=तस्याम इति। अदपदस्य शार्वरिप्यभावकार्यपरत्वाकर्षभ्रमामोव्यंग्य एवेतिभावः।१=

अविरलकरवालकंपनैर्भ्रुकुटीगर्ज्जनतर्ज्जनैर्मुहुः। ददृशे तव वैरिणां मदः सगतः क्वापि तवेक्षणेक्षणात्॥ अत्र वैरिणो गर्वरूपो भावस्तस्य शं-
मो राजविषयकरतिभावेंगं। भावोदयस्य यथा। साकं कुरंगकदृशो मधुपानलीलां कर्त्तुं सुहृद्भिरथ वैरिणि ते प्रवृत्ते। अन्याभिधायि
तव नाम विभो गृहीतं केनापि तत्र विषमामकरोदवस्थां॥ अत्र विषमावस्थाव्यंग्यस त्रासस्वरूप भावस्योदयो राजविषयर-
तिभावस्य। भावसंधेर्यथा। असोढा तत्कालोल्लसदसहभावस्य तपसः कथानां विस्रंभेष्वथ च रसिकः शैलदुहितुः। प्रमोदं
=अंकोनः।४= वो दिश्यात्कपटबटुवेषापनयने त्वराशैथिल्याभ्यां युगपदभियुक्तः स्मरहरः॥ अत्र स्मरहरगतावेगधैर्ययोः संधिर्नृप-
विषयरतिभावस्यांगं। भावशबलता यथा। पश्येत्कश्चि= चलचपल रे का त्वराहं कुमारी हस्तालंबं वितर हहहा व्युत्क्रमः
क्वासि यासि। इत्थं पृथ्वीपरिवृढ भवद्विद्विषोऽरण्यवृत्तेः कन्या काचित्फलकिसलयान्याददानाभिधत्ते॥ अत्र पश्येत्कश्चि-
दिति शंका। चल चपल रे इत्यसूया। का त्वरेति धृतिः। अहं कुमारीति स्मृतिरौत्सुक्यं च हस्तालंबं वितरेति श्रमः। अहहेति दै-

=तुल्यन्यायादिति॥ परोल्लासे कृतमलंकारत्वं यत्र तत्र गुणीभूतरसादिविषयत्वोदयात् [redacted] चापि सदाप्यक्तिकविकृतेति भावः॥ अलंकारत्वं सर्वत्र गुणीभावोदयभावसंधिभावप्रशमनतारूपस्य गलंकारनामनि [redacted] ॥=यत्प्रभृतेतद्भावसार्यतितत्र चेतनत्वादेप=

=रसवदाद्यलंकारत्वं गुणीभूतव्यंग्यत्वं च यो [redacted] रसादीनां हि प्राधान्ये तस्य विषयत्वेन वा सर्वस्वतापि साधुः॥=अलंकारध्वनिः सर्वत्र रसध्वनौ भावध्वनिः महत्तत्वपरिकल्पकार्ये पि कारकतया संकल्पनीः अवान्तरध्वनीनां प्रधानध्वनिरूपेण गुणीभूतव्यंग्यत्वमस्य वा॥

क्वचिद्गुणीभूतव्यंग्य इति तत्रापि क्वचिदलंकारध्वनिरिति क्व५

प्रदीपः

५७

57

संमुक्रम इति विबोधः चेतन्यागमरूपः कासिकासीसोत्सुकं एषांश्च बलतातपतिविषयरतिनावेगं एते च गुणीभूता रसाद्योर

सवदाद्यलंकारव्यपदेशं लभंते ननु गुणीभूतो रसो रसवान् भावस्तु प्रेयः रसभावाभासौ ऊर्ज्जस्वि भावशांतिः समाहितमित्यस्त्वे

व पूर्वेषामलंकारव्यवहारः न पुनर्भावोदयादिषु न तत्कथमेतदुच्यत इति चेत् प्रधान्यवचनं विनामहत्त्वचक्षिनादरस्तर्हि कश्चि

त्प्रेक्षावानवश्यं ब्रूयात् रसादिना तुल्यन्यायादिति ननु द्वाहतेषु ध्वनिगुणीभूतव्यंग्यभेदेषु ध्वनिभेदे रलंकारभेदैर्वा अ

वश्यं संकरः संसृष्टिर्वा वर्त्तते तत्कथं ध्वनिरिति क्वचिद्रसादिध्वनिरित्यादि एवं गुणीभूतव्यंग्य इत्यादि व्यपदेशानां

नियम इति चेत् प्राधान्यात् यत्र ह्यियत्प्रधानं तत्र तेन व्यपदेशः प्राधान्यं चाति [illegible] शयितश्चमत्कारः स च सहृदयहृदय

वेद्य इति ना सिद्धः अथ वाच्यांगभावेन शब्दशक्तिमूलसंलक्ष्यक्रमस्य गुणीभावो यथा जनस्थाने भ्रांतं कनकमृगतृष्णा

कुलधिया वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितं कृतालंकाभर्तुर्वदनपरिपाटीषु घटना मयाप्तं रामत्वं कुशलवसु

शिव:

५७

=नासिद्ध इति यत्र यत्र चमत्कारस्तत्र तेनैव व्यवहारः अयं सरसेनेत्यादौ करुणाध्वनावपि गुणीभूतव्यंग्यस्पष्टं गानेरौ वचमत्कारस्तेनैव व्यवहार इति भावः॥२=

शक्तिमूलत्वेन व्यपदेशः किं त्वर्थ ४

रामत १   मा   शांद १

तानवधिगता· अत्रपादत्रयेध्वन्यापि रामेण सहोपमया मैत्रमित्यनेन वाच्यतांनीता तदंगत्वं शक्तिमूलानुरणनरूपो द्वितीयोर्थः। वाच्य एवार्थशक्तिमूल
स्याङ्गभावो यथा· आगत्यसंप्रति वियोगविसंष्ठुलांगीमंभोजिनीं क्वचिदपिक्षपितत्रियामः। एतांप्रसादयति पश्यशनैः प्रभाते तन्वंगिपादप
तनेन सहस्ररश्मिः। अत्रार्थशक्तिमूलो नायकनायिकावृत्तांतो वाच्यरविकमलिनीवृत्तांताध्यारोपेण तदंगतयैव स्थितः समासोक्तौ
तु पाठविलोलेसादौ सर्वत्र प्रतीयमानार्थोपस्कृतवाच्यस्यैव प्राधान्यात्· अयंच पादपतनेति श्लिष्टशब्दसद्भावेपि न शब्दशक्तिमूलत्वेन
प्राधान्येन व्यपदेशः इतिन्यायात्· तद्व्यतिरेकेणापि नायिकानायकवृत्तांतव्यक्तिसंभवाच्च· नचोपमाच व्यंग्या· उल्लास्यकालेसादिवच्छ्लेषा
भावात्· नच वाच्यसिध्यंगत्वं· रविकमलिनीवृत्तांतस्य तन्मेरपेक्ष्यैणैव सिद्धेरिति· वाच्यसिध्यंगं द्विधा· एकवक्तृकपदवाच्यांगमन्य
वक्तृकपदवाच्यांगंच· भ्रमिमरतिमलसहृदयतांप्रलयंमूर्छांतमःशरीरसादं· मरणंच जलदभुजगजंप्रसह्य कुरुते विषंवियोगि
नीनां· अत्र हालाहलरूपोविषशब्दार्थो व्यंग्यः जलेभिधानियमनात्· सच जलदभुजगेति रूपकस्य वाच्यस्य सिद्धिंकरोति· अन्यथापि

तत्राद्यं यथा· २

मासंदेहसंभवात्· यथा धाम म· तादृगम्भतरसप्रसादकतकक्षोदांबुधाशयिताजीयासुः कविरलखाननभवतस्तास्ता वचोभंगयः॥ अर्थान्वियुक्ति-
णः पुरातनतरान्स्वधीनवान्कुर्वतीयाभिः कल्पमहौषधीभिरगदंकारायते भारती· अत्र रसप्रसादइत्यत्र जलप्रसादरूपोर्थोव्य-
ग्यः। स च वाच्यायाः कतकक्षोदांबुधारायाअंगं· अन्यवत्तं कशब्दे वाच्यस्यासिध्यंगं यथा· गच्छाम्यच्युत दर्शनेन भवतः किं तृप्ति-
रुत्सधते किं त्वेवं विजनस्थयोर्हतजनः संभावयत्यन्यथा· इत्यामंत्रणभंगिसूचित वृथावस्थानखेदालसामाश्लिष्यन्पुलकोत्क- को४
टं चिततनुं गोपीं हरिः पातु वः॥ अत्राच्युतेत्यनेन सोल्लुंठनत्वम् द्विषये विरसं इति व्यर्थमेवावस्थानमिति· यद्वा अच्युतेति धै-
र्याद्स्खलितत्वमतो व्यर्थमेवावस्थानमिति· दर्श नेनेत्यादिना संभोगेनेव तृप्तिरिति किंत्वेवमित्यादिना द्वयोरकीर्त्ति-
जों तेवतद्धेवात्मानं वंचयावइतिखेदश्च व्यज्यते· तच्च इत्यामंत्रणभंगिसूचितवृथावस्थानखेदालसामित्येतद्वाच्यस्य
सिद्धिकृत्· तद्व्यक्तिं विना एतद्विशेषणपदार्थस्य शरीरालाभात्· अस्फुटं यथा· अदृष्टे दर्शनोत्कंठा दृष्टे विच्छेदभीरुता· शिवः

=परगुणवत्लबोधकं सोल्लुंठ [illegible]रव्याख्यानमाह॥४८=

=तयोश्चप्राधान्येइति·चमत्कारप्रयोजकत्वरूपेणसमः।अत्रलोचनत्रयव्यापारणंधैर्यपरिहरणिश्चायकानुभावोवाच्योतोयपौत्सुक्यादीन्व्यभिचारिणोभिव्यञ्जयस्यापिचवर्णनीयापर्यवस्यतत्वात्तद्‌व्यंग्यप्राधान्यंव्यंगीभूतेश्चामभिव्यज्येवौत्सुक्यादेर्व्यञ्जनाद्‌यदितुनतिकार्यतायांसिवस्या=
=पिचवर्णनीयानपर्यवस्यतत्वात्तद्वाच्यस्य·नचात्रविनिगमकः।उभयोरपिप्रधानप्रसाम्यमहाप्रावत्वाच्च·नचतुल्यप्रधानतान्यथासिद्धिप्रमाभावादितिभावः।२=विवक्षितत्वाच्चेति·अनर्थनिवारकत्वेनेतिभावः।७=अत्रभवतुपदस्योमित्रत्वाभिधानंचप्रामतच्चवाच्यमुक्तमत्सोद

नादृष्टेननदृष्टेनभवतालभ्यतेसुखं·अत्रादृष्टोयथाननवसिवियोगभयंचयथानोत्पद्यतेतथाकुर्याइतिव्यंग्यंसहृदयस्यानस्फु
टमवभासते·संदिग्धप्राधान्यंयथा·हरस्तुकिंचित्परिवृत्तधैर्यश्चन्द्रोदयारंभइवांबुराशिः।उमामुखेबिंबफलाधरोष्ठेव्यापा
रयामासविलोचनानि·अत्रचुंबितुमैच्छदितिव्यंग्यंयुगपल्लोचनत्रयव्यापारणंवाच्यं·तयोश्च प्राधान्येसाधकमानाभा
वेनसंदेहः·वाच्यस्याप्यतो किंकत्वेनचमत्कारकारितादुक्तंणातिशयव्यंजकत्वात्·तुल्यप्राधान्यंयथा·ब्राह्मणातिक्रमत्या
गोभवतामेवभूतये·जामदग्न्यस्तथामित्रमन्यथादुर्मनायते·अत्रजामदग्न्यः·क्षत्रियाणामिवरक्षसामपिक्षयंकरिष्य
तीतिव्यंग्य[redacted]मिववाच्यमपिप्रधानमेव·दुर्मनायतइतिगंभीरोक्त्याचमत्कारित्वात्·ध्वनिरुत्वस्यध्वे
पिविवक्षितत्वाच्च·काक्वाक्षिप्तंयथा·मथ्नामिकौरवशतंसमरेनकोपादुःशासनस्यरुधिरंनपिबाम्युरस्तः।संचूर्णयामिगदया
नसुयोधनोरूसंधिंकरोतुभवतांनृपतिःपणेन·अत्रमभाम्येवेतिव्यंग्यंतद्वाच्यस्यनिषेधस्यसरूभावेनस्थितंतादृशकाका

=अत्रेति·अयमभिसंधिः·संधिश्रवणकुपितस्यभीमस्योक्तिरियं·तथाचप्रतिज्ञाविरुद्ध[redacted]निषेधाभिधायिषुनञ्शुकाकुरियंनिषेधांतवाक्षेपिकाभावाभावश्चावधारणंतस्यचवाच्यसमकालंप्रतीयमानत्वेनकाकुव्यंग्यनिषेधंविनावाच्यासिद्धेर्वा
=पर्यवसानात्तद्गुणीभूतव्यंग्यत्वमेवनध्वनित्वमिति·ततश्चयत्रकाकुतोपिविलंबेनोपस्थितिस्तत्रध्वनित्वमेव·यथोदाहृतेगुरुःनवेदविलम्बस्तत्र·तत्रहिकाक्वाक्षिप्तस्यवाक्षेपोनत्वमपिनयोग्यःस्वेदःकुतश्चयोग्यत्वसस्यगम[redacted]ति।१=काक्विति·
भवति

बाधक

=वाच्यस्येति·वाच्यार्थस्येत्यर्थः। अप्रादुर्भावादिति·अपर्यवसानादित्यर्थः॥१८=

प्रदीपः

५९ कुं विना वाच्यस्य बाधितत्वेनाप्रादुर्भावात् हठेनैव तदाक्षेपाद्धेतु[redacted]क्तं प्राक्·असुंदरं यथा·वाणीरकुंडङ्गुड्डीणसउणिको
लाहलं सुणंतीए·घरकम्मवावडाए वहुए सीअंति अंगाइं·अत्र दत्तसंकेतः कश्चिल्लतागहनं प्रविष्ट इति व्यंग्यं तस्माद्वाच्यं
चमत्कारि·शब्दश्रवणसमकालमेव सर्वांगावसादसंतन्यमानतारूपस्यातिसौंदर्यात् उत्कंठातिशयपर्यवसन्नत्वात्·
एषां भेदा यथायोगं वेदितव्याश्च पूर्ववत्·पूर्ववत्·ध्वनेरिव·चकारो भिन्नक्रमः। पूर्ववच्चेत्यर्थः। यथायोगं·यथासंभ
वं·तेनायमर्थः। न केवलमेत एव गुणीभूतव्यंग्यस्य भेदाः किंत्वर्थांतरसंक्रमितवाच्यत्वादिभिर्यथा ध्वनेर्भेदास्तथाऽसं
भविनो विहायास्यापि तै रूपादिभिः शुद्धभेदाः। संकरसंसृष्टिभ्यां योजने च तेषामेषां च संकीर्णभेदा अपि बोद्धव्याः। अ
संभविनश्च वस्तुमात्रेणालंकारव्यक्ति निबंधनाः। तदुक्तं ध्वनिकृता·व्यज्यंते वस्तुमात्रेण यदालंकृतयस्तदा·ध्रुवं ध्वन्यंग
ता तासां काव्यवृत्तेस्तदाश्रयात्·अत्र ध्वन्यंगता व्यंग्यतया·ध्रुवं ध्वन्यंगता ध्वनिनैव ता व्यज्यंते·तद्व्यंजकस्य ध्वनित्वमेवे शिवः

=वस्तुमात्रेणेति·वाच्यार्थमात्रविहितेनेत्यर्थः। न त्वलंकृतवस्तुनालंकारव्यंजनेतु यत्र वाच्यालंकारापेक्षया व्यंग्यस्य न चारुत्वं तत्र ध्वनित्वमेव·यथा चतुर्थोदाहरणेषु·यत्र त्वलंकारव्यंग्यालंकारस्य न चारुत्वं तत्र पुनर्गुणी=५९
=भूतव्यंग्यत्वमेव·यथा·नैसर्गिकगुणादिनीतं जनमतिकामिंजलोवंशः आजन्मनो [illegible] ·तथा च वस्तुव्यंग्यालंकृतिभेदहीनो [illegible] ·शुद्धेऽगुणीभूतव्यंग्यभेदः [illegible]॥२०

=अतिवत्प्रमेवेदेति. नरूनातिशय्येनाभीत्सर्थः॥ ५= पर्युदासवैयर्थ्यमिति. न च भस्मकोवेधाभावादिति भावः॥ ननु योगं द्वयोः संबंधमनतिक्रम्येत्यर्थकतया संकरादुपस्थापकमिदमिति तत्राह. संकरादीनामिति. न थापि. यथायोगमिति पदाभावेऽपि पूर्वे भांध्वनी नां प्रयोगः संकरादिभिस्तथा भावाभासादिभिः ॥ ८॥

सर्थः। कुतः काव्यवृत्तेस्तदाश्रयात्. काव्यपदप्रवृत्तेस्तदभिसंधानपूर्वकत्वात्. वस्तुमात्रापेक्षयाऽलंकारस्य चारुतानियमादित्यर्थः॥ ननु यद्य
लंकारापेक्षया वस्तुमात्रस्यानतिशय नियमस्तदा कथमलंकारेण वस्तुमात्रव्यंजने ध्वनित्वमिति चेत्. उच्यते. स एवार्थो वाच्यः सन्न त
थाचमत्करोति यथा व्यंग्यतापन्न इत्यनुभवसिद्धमतो वाच्यतापकर्षहेतुर्व्यंग्यतान्त्कर्षायेति स्थितं. यत्र चालंकारेण वस्तुमात्रं व्यंग्यं
तत्रालंकारस्य वाच्यत्वेन किंचिदपकर्षाद्वस्तुमात्रस्य च व्यंग्यत्वेन किंचिदुत्कर्षाद्युज्यत एव ध्वनित्वं. यत्र तु वस्तुनाऽलंकारो व्यज्यते तत्र व
स्त्वलंकारयोर्वाच्यत्वव्यंग्यत्वाभ्यामतिशये नैवोत्कर्षापकर्षाविति कुतो गुणीभूतव्यंग्यत्वावकाशः॥ इदं तु चिंत्यं. एवं चारुत्वाभावनिबंधनं गुणीभू
तत्वं मा भूत्. अगूढत्वादिनिबंधनं तु तस्मिन्को वारयितेति. यत्तु नरसिंहानामेव [redacted] भेदानां संकीर्णत्वमात्रातिदेशकमिदं सूत्रमिति व्याख्या
नं तदबोधात्. तथा हि सति यथायोगमित्यनेन वस्तुव्यंग्यालंकाररूपभेदपर्युदासवैयर्थ्यं. संकरादीनां तथाप्यव्याहतेः पूर्वं सजातीययो
गो ध्वनेरुक्तः। इदानीं विजातीययोगमाह. सालंकारैर्ध्वनेस्तैश्च योगः संसृष्टिसंकरैः॥ सालंकारैरिति विभिन्नार्थैकरूपनानाशब्दैकशेषः।

=तैश्चालंकारैरिति। सनामोक्तिरसवदादिरूपैर्गुणीभूतव्यंग्यैश्चालंकारैरित्यर्थः॥ आगमसंमतीत्वाद्गुणीभूतव्यंग्यनामिकानाम कवनां गुरुसंरक्षिकमजिनीव मांनोत्सर्पक स्य समासोक्त्यलंकारस्य रूपत्वादिति भावः॥ अलंकारसहितैश्चैतैरिति। अलंकार=
=सहितवस्तुरूपगुणीभूतव्यंग्यैरित्यर्थः॥ अलंकारस्यात्र वाच्यत्वेऽप्यस्फुटत्वमाह। तेनेति। १=पूर्वपराभ्यां। चेद्गुणीभूतस्यात्र स्यातां। सालंकारैरिति। वाच्यालंकारसहितैरित्यर्थः। स्वैः प्रभेदैः॥ अभिनवरसकौमितवाच्यादिभिः॥ २=आतामेरप्रकारः॥

प्रदीपः

६०

एकत्रालंकारपदस्यभावप्रधानत्वात्। तथाचैतैश्चालंकारैरलंकारसहितैश्चैतैरित्यर्थः॥ तेन ध्वनिनां गुणीभूत[redacted] व्यंग्येन वाच्यालंकारैरे च ध्वनेर्योग इति पूर्वापराभ्यामुक्तं भवति। तदुक्तं ध्वनिकृता। सगुणीभूतव्यंग्यैः सालंकारैः सह प्रभेदैः स्वैः। संकरसंसृष्टिभ्यां सह पुनरप्युद्योतते बहुधेति। स ध्वनिः। सालंकारैर्गुणीभूतव्यंग्यैः स्वैः प्रभेदैश्च सह संकरसंसृष्टिभ्यां बहुधोतत इत्यर्थः॥ अन्योन्ययोगादेवं स्याद्भेदसंख्यातिभूयसी एवं ध्वन्यादिभेदैस्तत्प्रभेदैश्च योजने ऽतिप्रभूता संख्या भवतीत्यर्थः॥ एतैः प्रभेदैरूपनिबध्यमानः पुरातनोऽप्यर्थो नवनवीभवतीति सप्रयोजनं ध्वनिभेदोपदर्शनं। यदुक्तं ध्वनिकृता। ध्वनेर्यः सगुणीभूतव्यंग्यस्यात्मा निदर्शितः॥ एतेनानंत्यमायाति कवीनां प्रतिभागुण इति। तदेवमनंतानां ध्वननव्यापारयोगिनां ध्वनीनां गुणीभूतव्यंग्यानां च काव्यभेदानामनुगतोपाधिना संकलने त्रयो भेदाः। व्यंग्यस्य त्रिरूपत्वात्। तथाहि। किंचिद्व्यंग्यं वाच्यत्वसहं किंचित्तदसहं। वाच्यत्वसहत्वं त्वभिधया प्रतिपाद्यमानस्यापि चमत्कारकारित्वं। तयोराद्यं वस्तुमात्रमलंकारश्च। अलंकारस्य प्राधान्येऽपि यथालंकारं तथोक्तं प्राक्। रसादिलक्षणस्त्वर्थो न कदाचिदपि वाच्यत्वं सहते। स हि सामान्यतो

वस्त्वलंकाररसादि
रूपत्वात् =३

धो॰

श्रिवः

६०

रसभावादिपदैर्विशेषतः शृंगारनिर्वेदादिपदैर्वाभिधीयमानश्चमत्कारकारी स्यात्. न त्वेवं. तथाभिधानेऽपि विभावाद्यप्रतीतौ चमत्काराभावा
त्. विभावादिप्रतीतौ त्वनभिधानेऽपि व्यक्तस्य चमत्कार[redacted]कारित्वादित्यन्वयव्यतिरेकाभ्यां विभावादिमुखेनैव प्रतीयमानस्त्वपे
ति निर्णीयते तेनासौ व्यंग्य एव चमत्कारी. ननु विभावादिवाचकपदैर्लक्ष्य एवास्तु रसादिः न हि विभावादिवाचिपदं विनापि तत्प्र
गत्वादिविषयाथाः — ४ तीतिरिति चेन्न. मुख्यार्थबाधादिविरहात्. ननु व्यंजनायाः शशविषाणायमानत्वात्कुतो व्यंग्यत्वे रूप्यहूतोनेद इति चेत्. उच्यते.
लक्षणामूलेव वस्तुमात्रं व्यंग्यं विना लक्षणैव न संभवतीति प्राक्प्रतिपादितं. अभिधामूलेऽपि शृणु. किंमूलो द्वितीयोऽर्थस्तेन स पदार्थविशेषाणां गवादिपदार्थगोत्वादिसामान्यादितृणगवादिव्यक्तीनाम्
मनुपमाव्यंग्यैवेति निर्विवादं. अभिधाया नियमात्. अर्थशक्तिमूलेप्येवमंगीकर्त्तव्यं. यतः पदेभ्यः प्रथमं पदार्थस्मृतिरथ पदा
गवाद्यन्वितमर्थत्वादिरूपस्य र्थविशेषाणामन्वयविशेषरूपस्य वाक्यार्थस्य प्रत्ययः ततो व्यंग्यप्रतीतिरिति तृतीयकक्ष्यायां कुतोऽभिधायाः प्रसरणं. द्वितीयक
क्ष्यायामेव तदनपेक्षणात्. यतोऽभिहितान्वयवादे शक्य एवान्वय आकांक्षादिवशेन प्रतीयते. शब्दबुद्धिकर्मणां विरम्यव्यापारा

=अथमिति प्रयोज्यवृद्धः प्रयोजकवृद्धवाक्यश्रवणानन्तरं गवानयनादिक्रियां कुर्वन् तद्विषयकगोचरकार्यताज्ञानवानिति अर्थः ॥ २ ॥ =एतद्विषयकेति गोविषयक चेष्टावत्त्वादित्यर्थः एवं चेष्टया तत्कार्यताज्ञानमनुमितमित्युक्तं कादाचित्कम्
=मितप्रत्यक्षानुमानमित्यादि एतद्विषयकेति अत्र च गोपदविषयकत्वावान्यविषयकप्रयोजकवृद्धप्रमितानां वाक्यतद्विषयकक्रियागोचरकार्यताज्ञानवानिति सामान्यतो आपीनमद्वैदितिद्वयानः ॥ २ ॥ =कार्यत्वेति तज्ज्ञानं निष्ठकार्यत्वनिरूपितजनकत्व

प्रदीपः

६१ 61

तच्चायं क्रमः चेष्टया प्रवृत्तिरनुमीयते ततः तया इच्छा ततस्तया ज्ञानमनुमानम्

वास४

प्रामकराः अन्यथाकार्यमेतदस्ति देवदत्तानायत्व

पामद३

स्य४

भाव इति च सर्वसिद्धं येषामन्विताभिधानवादिनः देवदत्त गामानयेत्यादि प्रयोजकवृद्धवाक्यं श्रुतानन्तरं प्रयोज्यवृद्धेन सास्नादिम
तमर्थं देशान्तरं नीयमानमालोक्यायमेतद्विषयकैतक्रियागोचरकार्यताज्ञानवान् एतद्विषयकचेष्टावत्त्वात् एतद्विषयकप्रवृ
त्तिमत्त्वादिति प्रयोज्यवृद्धस्य ज्ञानमनुमिमीते ततः कारणं विना कार्यानुपपत्त्या एवं वाक्यस्यान्वयव्यतिरेकित्वज्ञानेन
कार्यत्वकारणस्वरूपां शक्तिमवधारयति अथ ज्ञेयसंबंधं विना वाक्यस्य शक्तिरनुपपन्नेति अर्थापत्त्या एवं वाक्यार्थेनाखं
डस्य वाच्यवाचकरूपं संबंधमवधारयति यदुक्तं शब्दवृद्धाभिधेयांश्च प्रत्यक्षेणात्र पश्यति श्रोतुश्च प्रतिपन्नत्वमनुमाने
न चेष्टया अन्यथानुपपत्त्या तु बोधेच्छक्तिं द्व्यात्मिकां अर्थापत्त्या च बुध्येत संबंधं त्रिप्रमाणकमिति त्रिप्रमाणकमिति
जात्यपेक्षया त्रित्वं न तु व्यक्त्यपेक्षया एवमखंडयोः संबंधमवधार्य विशेषतो व्युत्पद्यते कथं इत्थं अनन्तरं तेनैव प्रयो
जकेन चैत्र अश्वमानय देवदत्त गां नयेत्यादिवाक्ये शुकस्य चिदन्यस्य पदस्यावापे कस्य चिदुद्धारे च सति यस्य वाक्यभागस्यान्व

शिवः

६१

=कार्यं विना कार्यानुपपत्तिरूपार्थापत्त्या ॥ ३ ॥ =अर्थापत्तित्वरूपजात्यपेक्षया अन्यथानुपपत्तिरर्थापत्तिरेवेति भावः ॥ ३ ॥ =चेष्टेति कार्येत्व = प्रत्यक्षानुमानार्थापत्तिरूपप्रमाणत्रयपर्यवसानं ॥ ३ ॥ =शब्दवृद्धाभिधेयांश्चेति
=संबंधमिति तन्मात्रात्तत्वावार्यतिनस्यापिवोधः स्यादिति भावः ॥ ४ ॥ =नतु व्यक्तीति ... रूपा ॥ ५ ॥ =यदीति श्रोत्रेन्द्रियप्रयत्नमित्यादि ॥ ६ ॥ =वाक्यभागेषु वद्दिः ॥ ७ ॥
॥ ६ ॥

वाक्यार्थभागो मयापर्थः ।१। अन्वयमिति । अन्वयविशिष्टस्यार्थः ।२। उपनीयेति । वाक्यादन्वितज्ञानकल्पनमुपपत्तेः ... नन्वन्वयलाभस्यान्वयांशेन शक्तिकल्पनाकिंतु पदार्थस्वरूपांशः
एवं सत आह । व्यवहारे इति । उपस्थापनात् अनुभवात् । तथा च ... अन्वितज्ञाने न्यायाभिः ... तदाह नत्विति ।४। पदानामिति । प्रत्यस

यव्यतिरेकाभ्यां यस्य वाक्यार्थभागस्यान्वयव्यतिरेकावुपलभेते तत्रैव तस्य शक्तिमवधारयति । तत्र शक्त्यवधारणमन्वित एव पदार्थे । प्रथम
मन्वय एव वाक्यस्य शक्तिग्रहात् । पदार्थमात्रे शक्त्यावुपजीव्यबाधात् । व्यवहारेणान्वितज्ञानस्यैवोपस्थापनात् । न च वाक्यं विना कश्चिदाद्यव्यु
त्पत्तिः । व्यवहारेणैवाद्यव्युत्पत्तेः । व्यवहारस्य च प्रवृत्तिनिवृत्तिरूपस्य पदमात्रेणाकर्तुमशक्यत्वात् । अतो वाक्यस्थितानामेव पदानामन्वि
तेष्वेव पदार्थेषु संकेतग्रहाद् अन्विता एव पदशक्याः । त एव च वाक्यार्थ इति न वाक्यार्थबोधे शक्तेर्विरामः । न त्वभिहितानां पदार्थानामन्वयोऽश
क्य एव प्रतीयते योग्यतावशादिति युक्तं । ननु तथापि संसर्गविशेषोऽशक्य एव पदार्थसामान्य एव शक्तिग्रहात् । अन्यथा गामानयेति पदं विना
श्रुत्वाऽश्वमानयेत्यादिवाक्ये तदेवेदमानयपदमित्यादिप्रत्यभिज्ञानस्याभावः । पूर्वस्य गवान्वितानयनपरस्याश्वान्वितानयनेऽशक्यत्वेना
र्थभेदेन भेदादिति चेन्न । पदार्थत्वेन सामान्येन विशेषाणामेवान्वये शक्तिग्रहादन्वितानां च विशेषरूपत्वादित्याहुः । तेषामपि मते सा
मान्येनैव रूपेण विशेषः शक्यो न तु विशेषरूपेण । तथा च पदार्थान्तरसामान्यान्वित एव पदानां शक्तिः गवादिविशेषान्वितत्वे तु

सामान्यान्वित एवेति । कारकान्वितानयनकर्मानयपदं क्रियान्वितगोपदं गो ... विशेष संसर्ग अन्वये ... अन्वितानामिति । अन्वयप्रतियोगिनां पदार्थानां ... पदार्थविशेषनिरूपितान्वयविशेष इति शेषः ...

सामान्येनैवरूपेणेति कारकान्वितानयनत्वादिरूपेण क्रियान्विते गो
त्वादि सामान्यरूपेणैव शक्ते रित्यर्थः

=असंकेतितएवेति । सामान्यलक्षणया अन्वयेन विशेषस्य लक्षणया संकेतग्रहविषयत्वादित्यर्थः । एवं च सदनंतनस्य सामान्यस्य रूपस्य सर्वथा न विषयत्वमिति भावः ।२= अतीति= यावद्यदार्थप्रतीतिप्रसंगात्तु सकस्या
=शब्दश्रवणमात्रेणार्थप्रतीतिप्रसंगात् अस्य शब्दस्य प्रमाणस्य वक्तृज्ञानस्यैव करणत्वानियमात् सर्वः ।३= असत्यामकांक्षायां तदन्वयबोधदर्शनेनैव ... न्वितानयनं कारणं वक्ताऽऽक्ष मानयेति वाक्यबोधस्य ...

शेषो वाच्य एवेति । तस्मादभिहितान्वयवादे ऽनन्वित एव अन्विताभिधाननये तु पदार्थसामान्यान्वितः स्वार्थः संकेतविषयः । गवादिविशेषा
न्वितानयनादिरूपस्तु संकेतित एवेत्स वाच्य एव वाक्यार्थः । यदपि केश्चिदुच्यते । शब्दश्रवणानंतरं यावानर्थः प्रतीयते तच्च सर्वं वाच्यमिति शब्द
एव निमित्तं । यतो नैमित्तिकानुरोधेन निमित्तानि कल्प्यन्त इति । तदप्ययुक्तं । शब्दस्य त्वर्थे निमित्तत्वं कारकत्वं ज्ञापकत्वं वा । न प्रथमं । शब्द
स्यार्थानुत्पादकत्वात् । न चरमं पुनरनुमन्यते परं तु संकेतबलेन ज्ञातस्य । अज्ञातस्य स्वरूपेणाज्ञातस्य वा ज्ञापकत्वे ऽतिप्रसंगात् । न
चान्वयविशेषे संकेतग्रहः । अस्तु विशेष एव संकेतग्रह इति चेत् । लोष्टाद्यन्वितानयनादेर्विशेषस्योपस्थापकांतराभावे न [redacted]
शब्दादेवोपस्थितिर्वाच्या । तथा च तत्र संकेतग्रहे शब्दात्तदुपस्थितिः शब्दात्तदुपस्थितौ संकेतग्रह इत्यन्यो
न्याश्रयात् । तस्मान्नैमित्तिकानुरोधेन निमित्तानि कल्प्यन्त इत्यविचारिताभिधानं । अथ सोयमिषोरिव दीर्घदीर्घतरो व्यापार इति य
त्परः शब्दः स शब्दार्थ इति च निःशेषसादौ विधिरेव वाच्य इति भट्टमतोपजीविनः । अस्यार्थः । यथा बलवता प्रेरित इषुरेकेनैव वेगाख्येन व्या
र्थ
=नयकसमीपगमनरूपः ।१=

= एकएवेति· सक्तोविभुक्तन्सत्यर्थः· नचैकार्थप्रतीतौयाद्दस्यविरामः· विवक्षितार्थप्रतीतिजननमेवविरामांगीकारादितिभावः।१८= ननुयद्विधेयंतत्रतात्पर्यं विधेयत्वंचप्रमाणांतराप्राप्तविधिविषयत्वंतत्ताक्रियायाएवनतद्भावेदितिदिभाक्त्वेतौसत्यस्यतात्पर्यमेवप्रा=

= मााएपनेस्यात्तआह· भ्नेतीति·= नन्वेवमप्यक्रियारूपताकार्यंप्रवर्त्तनाविषयत्वमेताम्।एकाश्चेतिंर्थादभावृहोतीसदैप्रधानाक्रियायाहोमस्यानुकूलादधिक्रियापूर्वदेशसंयोगध्वंसहेतुविभागजनकःस्पंदोयत्तणव्यत्कायोगात्त्वनःसि

य.पर·९७ इत्यस्या

तात्पर्यं वाचो युक्तेरि
ति यत्तत्र इत्यादि
वाक्यस्यैतदर्थः—२
प्रभो·

पारेणमर्म्मछेदमुरोभेदंप्राणहरणंचरिपोर्विधत्ते तथैक एवशब्दएकेनैवाभिधाख्यव्यापारेणपदार्थस्मृतिंवाकार्थानुभवंव्यंग्यप्रतीतिंच विधत्ते·अ तोव्यंग्यत्वाभिमतस्यार्थस्यवाच्यत्वमेव· किंच· यत्रशब्दस्यतात्पर्यंसशब्दार्थइति निःशेषेस्यादौ तात्पर्यविषयत यादिधिर्वाच्य एवेति· नेतात्पर्यवाचो [redacted]युक्तेस्तात्पर्यमज्ञानंतःपशवः। तथाकथमन्विंपदोपस्थापितएव हितात्पर्यमुच्यतेनप्रतीतमात्रे· तथाहि· भूतंभव्यसमुच्चारणे भूतंभव्यायोपदिश्यतइति सिद्धांतः।अस्यार्थः।भूतंसिद्धंभव्यंसाध्यं तयोःसमभिव्याहारेभूतंसिद्धंभव्यायसाध्यायोपदिश्यतइति कारकपदार्था ःक्रियापदार्थेनान्वीयमानाःसिद्धाअपिप्रधानक्रियानुकूल यासाध्या भूतयास्वक्रियायायोगात्साध्यतामाभवंति· स्वरूपेणसिद्धाअपिसा ध्यक्रियाविशिष्टतयासाध्याइवभवंति· ततश्चयथादहनेनादग्धमात्रंदह्यते नतुदग्धमपितथायावदेवाप्राप्तंतावदेवशब्देनविधीयते न तुप्राप्तमपि यथाऋत्विक्प्रचरणेऽन्यतःप्राप्तेलोहितोष्णीषाऋत्विजःप्रचरंतीत्यनेनलोहितोष्णीषत्वमात्रंविधीयते नतुऋत्विक्प्रचरणंवा उष्णीषस्यापिप्राप्तेर्लोहित्यमात्रंहवनस्यान्यतःसिद्धेश्चदध्नाजुहोतीत्यनेनदध्नःकरणत्वंनतुदधिहवनंवा·एवंरक्तंपटंवयेत्यादौ

= नन्वेवमपिस्वतःक्रियारूपस्यहोमस्येवविधेयतास्यादतआह· तत्त्वेति· होमस्यापिसिद्धत्वंजुहोतीतिवाक्यान्तरेणैवेतिभावः।२=लोहितेति·अध्वर्युहोत्रृणां ऋत्विजांप्राप्तत्वान्नविधेयाद्भूसाम्नातितिः२= ननुसोपष्ठीषानिवीनव=

= समाऋत्विजःप्रचरंतीतिवाक्यादुष्णीषापि[illegible]प्राप्तस्यहवनआह उष्णीषस्यापीति·१= ननुदधीति·साधनद्रव्यत्वेनाक्षेपतस्तत्प्राप्तेर्दिनिभावः। हवनंवेति·अग्निहोत्रंजुहोतीतिवाक्यात्तस्यापिप्राप्तेरितिभावः।१=

[illegible]

=धत्वेऽपि शब्दोपात्तविधेयस्यैव तात्पर्यं ॥१॥ तात्पर्यं एवं च यत्र प्रमाणशब्दोपात्तत्वाभावात्तात्पर्याभावान्न तत्र वाक्यभेद इति भावः ॥२॥ तात्पर्यं स्यादिति एवं चान्यप्रमाणेनाप्राप्तार्थे तत्रापि पूर्वमाहृत्य शक्तिसाधकं तात्पर्यं स्यादिति भावः ॥३॥ न्यायादिति एवं च=
=श्रुतेनयपरस्य गुणयोः पूर्वस्यैव मनन्वयतस्तथा प्रधानयोरपि समत्वेनैव यथान्यप्रमाणानन्वयः स्यादित्यर्थः ॥४॥ अविततमन्त्रेति सचान्वयोन साक्षात्तत्र कर्तृभावादिनाबाधात् नोपि मुख्यार्थमादाय परम्परयोपकारकतया तत्र विषमलक्षणवाक्यस्य=
=मुख्यवाक्यत्वेन मुख्यार्थबाधाभावात्तस्यैवांगतापत्तेर्लक्षणाश्रयणेन कल्प्येति तत्र विषमलक्षयेतस्य विषमलक्षणाधिकबलवदनिष्टानुबंधित्वविधिरेव नजरूपभंजनेन लक्षणा तस्य च मानान्यत्वादिवाक्यार्थे सर्वथैव तत्संबलितैव तेनान्वयः ॥५॥

प्रदीपः
६३
63

स्नातपटवर्यैर्नामधेय एकस्य द्वयोस्त्रयाणां वा ॥ सिद्धे एकविधिर्द्विविधिस्त्रिविधिर्वा ॥ ततश्च यावदेव विधेयं तावत्स्येव तात्पर्यं ॥ विधेयं च शब्दोपात्तमे
वेति सुष्ठूक्तं शब्दोपात्त एव तात्पर्यमिति ॥ यदि च प्रतीतमात्रे तात्पर्यं न तदापूर्वाधावतीत्यादौ पूर्वादि समानसंवित्संवेद्यतया प्रतीते परार्थेऽपि क
दाचित्तात्पर्यं स्यात् ननु नद्वाक्यवर्त्ति पदोपस्थापित एव तात्पर्यमिति नियामिति ॥ विषं भुंक्ष्व मा चास्य गृहे भुंक्ष्वा इत्यत्र विषं भुंक्ष्वेति वाक्य
स्य माचेत्यादिवाक्यार्थे पितात्पर्यादिति ॥ मैवं ॥ यत एतदेकमेव वाक्यं ॥ चकारस्यैकवाक्यतासूचकत्वात् अन्यथा तद्वैयर्थ्यप्रसंगात् न चा
स्यातवाच्यक्रिययोः साक्षादन्वयः संभवति गुणानां च परार्थत्वादसंबंधः समत्वात्स्यादिति न्यायात् सुहृद्वाक्यं चेदं अतोऽभिवितव्यम
त्रान्वयेन ॥ ततो विषभक्षणादप्येतद्गृहभोजनमनिष्टसाधनमतः स[...] र्वथानास्य गृहे भुंक्ष्वा इति वाक्यार्थः ॥ तथा च तद्वाक्यस्य शाब्द
पस्थित एव तात्पर्यमिति सिद्धं ॥ तस्माद्यत्परः शब्द इत्यादि यदुक्तं तत्तात्पर्याज्ञानात् यदपि सोऽयमिषोरिवेति तदप्ययुक्तं ॥ यतः शब्द
श्रवणानंतरं यावानर्थः प्रतीयते तावति सर्वत्र यदि शब्दस्याभिधेयत्वं स्यात्तदा चैत्रपुत्रस्ते जातः कुमारी ते गर्भिणीत्यादिवाक्यानंतरं

शिवः
६३

=तत्राह ॥ तत्रेति ॥ ततश्च यत्र वाक्यस्यार्थे न किंचिदभ्यातियथात्रैव सुहृद्भक्तकत्वात्तत्र सुहृत्त्वार्थे तात्पर्यात्तल्लक्षणा ॥ यत्र तु स्वार्थबोधेन न बोधोत्तरमिति न तत्प्रतीयते तत्र व्यंजनैव मधयटकार्यः ॥६॥

श्रुत्यादिस्वरूप विनियोगबोधकाः = ४

हर्षविषादयोः प्रतीतेस्तमोरपि तद्वाक्यस्याभिधास्यात् · अथ तच्छब्दप्रतिपाद्ये सर्वत्राभिधा हर्षादयस्तु न तत्र त्वाप्याद्रसुच्यते न हि लक्षणीये
प्यभिधैव स्यादिति लक्षणाच्छेदः ॥ किमिति च श्रुतिलिंगवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादिति सूत्रेण
भगवान् जैमिनिः श्रुत्यादिषु पूर्वबलीयस्त्वं प्रतिपादयांबभूव · सर्वत्रैवाभिधाप्रसंगे उत्तरस्य दौर्बल्ये बीजाभावात् · सत्यं तु प्रकृता
र्थविच्छेदकत्वेपि बहुप्रकारकत्वाद्दुरूहत्वाच्च व्याक्रियते · श्रुतिलिंगादयः षड्विनियोजकाः तत्र विरुद्धयोरेकत्रोपनिपाते समुच्चयो न
संभवतीत्येकेनापरस्य बाधो वक्तव्यः स च बलवता दुर्बलस्येति स्थिति दौर्बल्यप्रतिपादकं सूत्रं श्रुतिलिंगेत्यादि · अस्यार्थः ॥ श्रुत्यादीनां स
मवाये एकत्रोपनिपाते तेषां मध्ये यदपेक्षया यत्परं तदपेक्षया तद्दुर्बलं · कुतः ॥ अर्थविप्रकर्षात् · पूर्वापेक्षया विलंबेनार्थप्रत्यायक
त्वात् · यथा चैतत्तथोदाहरणे स्फुटीकरिष्यते · तत्र निरपेक्षो रवः श्रुतिः ॥ यथा व्रीहीनवहंतीति · अत्र क्रियाफलभागित्वं कर्मत्वं बोधयं
ती द्वितीया निरपेक्षैव व्रीहीणामवघातशेषित्वं प्रतिपादयति · अर्थविशेषप्रकाशनसामर्थ्यं लिंगं · यथा बर्हिर्देवसदनं दामीति · अत्र

स्वार्थबोधे शब्दान्तरानपेक्षः = २

प्रदीपः

६४ 64

लवनार्थप्रकाशकतया बर्हिर्लवने विनियोगः। परस्पराकांक्षावशात्क्वचिदेकस्मिन्नर्थे पर्यवसितानि पदानि वाक्यं यथा· देवस्य त्वा सवितुः प्रस
वे ऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपामीत्यत्र लिंगेन निर्वापे विनियुज्यमानस्य समवेतार्थभागस्यैकवाक्यताबलेन देवस्य त्वेत्या
दिभागस्यापि तत्र विनियोगः। लब्धवाक्यानां पदानां कार्यान्तरापेक्षावशाद्वाक्यान्तरेण संबंधः आकांक्षापर्यवसन्नं प्रकरणं· यथा समिधो य
जतीत्यादौ· अस्य हि दर्शपौर्णमासकथंभावाकांक्षायां पाठवशाच्छेषत्वं· स्थानं क्रमः। स चानेकसाम्नातस्य सन्निधिविशेषाम्नानं· य
था दब्धिरसीत्यत्राग्नेयाग्नीषोमीयोपांशुयागाः क्रमेणाम्नातेषु पठिताः। मंत्रभागेपि क्रमेणानुमंत्रणत्रयं पठितं· तत्राग्नेयाग्नीषोमी
ययोर्लिंगेनैव द्वयोर्विनियोगसिद्धिः। दब्धिरसीत्यत्र तु न लिंगादि विनियोजकं किंतु यस्मिन्प्रदेशे ब्राह्मणे उपांशुयागविधानं तस्मिन्ने
व प्रदेशे मंत्रेप्यस्य पाठ इति क्रमादुपांशुयागानुमंत्रणेऽस्य विनियोगः। समाख्या योगबलं· यथा हौत्रमौद्गात्रमित्यादि· तत्र हि हो
तुरिदं हौत्रमित्यादियोगबलेन हौत्रादिसमाख्यातानि कर्माणि होत्रादिभिरनुष्ठेयानि· अथैषां विरोधोदाहरणानि· तत्र श्रुति लिं शिवः

६४

गयोर्विरोधे लिंगस्य दुर्बलत्वं यथा· कदाचनस्तरीरसि नेन्द्र सश्चसीत्यादिकाया ऋचो विनियोजिका श्रुतिः ऐन्द्र्या गार्हपत्यमुपतिष्ठत इति· अ
त्र चेन्द्रप्रकाशनसामर्थ्यरूपाल्लिंगादिन्द्रोपस्थापने विनियोगः प्रतिभाति· अन्यप्रकाशकस्यान्यत्र विनियोगायोगात्· श्रुत्या गार्हपत्यो
पस्थापने संप्रतीयते· गार्हपत्यमिति द्वितीया हि कर्मविभक्तितया कामपि क्रियामपेक्ष्य प्रकृत्यर्थस्य शेषित्वं बोधयति· क्रियाजन्यफ
लभागित्वस्य तदर्थत्वात्· एवमैन्द्र्येति तृतीया प्रकृत्यर्थस्य शेषत्वं· क्रियां प्रति साधकतमत्वरूपकरणत्वस्य तदर्थत्वात्· तदत्र श्रु
तिलिंगयोर्वि रोधः। न च वाच्यं निरपेक्षया द्वितीयया शेषित्वमात्रं प्रतीयते न तु ऐन्द्र्या मन्त्रं प्रति· तच्चाग्नेयीमन्त्रं प्रत्यपि संभवतीति कु
तो विरोधः· ऐन्द्र्येति पदमनपेक्ष्य विशेषबोधनाद्विरोध इति चेत्· न तर्हि श्रुतेर्विरोधः· किंतु वाक्यस्य तच्च लिंगापेक्षया दुर्बलमेवेति
यतः शेषशेषिभावः सामान्यतः श्रुत्यैवावगम्यते· पदान्तरप्रक्षेपात्तु विशेषव्यवस्थाप्यते· विशेषत्वसंबन्धमात्रस्य पदान्तरसंब
[redacted] पात्प्रतीतेः। तस्माच्छ्रुत्या सामान्यतः प्रतिपाद्यो यो वाक्यलभ्यं विशेषमपेक्ष्य लिंगप्रतिपाद्येन विरुध्यते

प्रदीपः
६५
65

तत्रायं पूर्वः पक्षः। सामर्थ्यज्ञानमपेक्ष्य श्रुतिर्विनियोजिका। न ह्यसमर्थं श्रुतिसहस्रेणापि विनियोक्तुं शक्यते यथा वह्निः प्रसेके जलं वा दाहे। अतो
लिंगस्य बलवत्त्वादिंद्रस्योपस्थापने ऽस्या विनियोगः तदनुरोधितया द्वितीयासमर्पणतयाप्याख्येया। गार्हपत्यसमीपे ऽनयेंद्र उपस्थात
व्य इत्यर्थः पर्यवस्यति। सिद्धान्तस्तु। श्रुतिः स्वरूपसत्सामर्थ्यमपेक्षते न तु तद्बोधमपि येन लिंगं बलवद्भवेत्। तस्य च पूर्वं सत एव ज्ञानं
विनियोगान्यथानुपपत्त्या पश्चादुपजायते। लिंगं तु विनियोजने श्रुतिमपेक्षते। न ह्यनेनेंद्र उपस्थातव्य इति लिंगात्त्वरेसतः प्रतीयते ॥
किं त्वीदृग् इंद्र इत्येतावन्मात्रं। तथा च प्रकरणाम्नानसामर्थ्यादिंद्रप्रकाशनसमर्थाया ऋचः अन्यथानुपपत्त्या विनियोगः कल्पनी
यः [redacted]। तथा चार्थविप्रकर्षः। तथा हि। श्रुतार्थापत्तिसाधकन्यायेन यथेंद्रोपस्थापिनैवं गार्हपत्याकांक्षा पूर्यते इति लिंगेनानयेंद्र
उपस्थातव्य इति कल्पनीया ततस्तया विनियोगो भवेत्। ततो यावल्लिंगं श्रुतिकल्पनायै प्रक्रांतं व्यापारं तावत्त्वरयैव श्रुत्या गा
र्हपत्ये विनियोगः सिद्ध एवेति प्रकरणे निराकांक्षे कथमन्यथानुपपत्त्या श्रुतिः कल्पनीया तस्माच्छ्रुतेर्बलवत्त्वात्तदनुगुणतयास्या शिवः

६५

मर्थ्यनीयमाने इंद्रपदं परमैश्वर्यवाचकतया गार्हपत्यतात्पर्यकमित्यवधार्यते· लिंगवाक्ययोर्यथा· पुरोडाशस्य स्थानकरणस्थापने स्वरूपयोः स =
दनसादनयोः प्रकरणे स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि· तस्मिन्त्सीदामृते प्रतितिष्ठ व्रीहीणां मेदः सुमनस्यमान इति मंत्रः
पठितः। तत्र कल्पयामीत्यंतः पूर्वभागः सदने शेषभागस्तु सादने [redacted] प्रयोक्तव्य इति लिंगात्प्रतिभाति· अयं मंत्र एकं वाक्यं· यत्सदाक्षेपेणाय क
ल्पयामि तस्मिन्त्सीदेत्येकार्थावच्छिन्नत्वाद्विभागे साकांक्षत्वाच्च· ततश्चैक[redacted]वाक्यत्वात्समस्त एवोभयत्र विनियोक्तव्यो देवस्य त्वेत्यादिव
दिति वाक्यादवगम्यते तदनयोर्विरोधः। अत्र पूर्वपक्षः। अस्यैकवाक्यत्वे निश्चिते पश्चात्तदुपपत्तये ऽभिधानसामर्थ्यं कल्पनीयं यत्कल्पित
यास्तु श्रुत्या विनियोगो भवेत्· यथा देवस्य त्वेत्यादिमंत्रे ऽग्नये निर्वपामीति पदयोः समवेतार्थयोरेकवाक्यतया अतादृशां पदांतराणां साम तयानरू
र्थ्यकल्पना तथात्रैकवाक्यतानिर्वाहाय सकृत्प्रसामर्थ्यं न तत्त्याहंतुमर्हति किंतु विनियोजिकां श्रुतिं कल्पयत्समस्तमंत्रविनियोजिकामेव कल्प
यतीति वाक्यस्योपजीव्यत्वेन बलवत्त्वात्समस्तस्यैवोभय[redacted]त्र विनियोग इति· सिद्धांतस्तु· यद्यप्येकवाक्यतामवगम्यैव सामर्थ्यमवधार्येतन

मसीमः
६६

दोपजीव्यत्वाद्वाक्यं बलवद्भवेत् । न त्वेवं । प्रस्तुतावधृत सामर्थ्यानां सन्निहितपठितानां [redacted] पदानां सामर्थ्यवशेन प्रयोजनैकवाक्यतया चैकवाक्यताव
धारणं । यावन्ति पदानि प्र[redacted]धानमेकमर्थं प्रतिपादयितुं समर्थानि विभागे साकांक्षाणि भवन्ति तावत्येकं वाक्यं भवति । अनुष्ठेयश्चार्थो मन्त्रे
प्रकाशमानः प्रधानं । सदनं सादनं चात्र तथाभूते । तथा च सदनप्रकाशनसमर्थः पूर्वभागः । सादनप्रकाशनसमर्थः शेषभाग इति प्रथती मप्र
ताभ्यां तत्सामर्थ्याभ्यां क्लृप्तेन श्रुतिद्वयेन भागे वत भागयोः प्रत्येकं विनियोगे सिद्धे तावतैव प्रकरणपाठोपपत्तौ समस्तमन्त्रस्यैकवाक्यता
बुद्धिरुत्पन्नाप्यासी(गा)भवति लिंगेन बाधात् । तथा क्रममपि सामर्थ्यं न श्रुत्यन्तरं कल्पयितुमर्हतीत्यर्थविप्रकर्षाद्वाक्यं दुर्बलं । तस्माद्य
त्रावान्तरवाक्ये विरोधि लिंगं नास्ति तत्र समवेतार्थकेनैकेन पदेन द्वाभ्यां त्रिभिर्वा सहैकवाक्यतापन्नान्तराणामपि सामर्थ्यं विनि
योजकश्रुतिकल्पनानुकूलं कल्प्यते । यथा चैव स्योनं त इत्यादि [redacted] भागानां प्रकरणे [redacted] योर्यथा । दर्शपौर्णमासप्रकरणे
इदं द्यावापृथिवी भद्रमभूदित्यादिकः सूक्तवाकनिगदः पठितस्तत्र च इंद्राग्नी इदं हविरजुषेतामवीवृधेतां महो ज्यायोऽक्रातामग्नी

वाक्य २

शिवः
६६

× एवमग्नीषोमपदममावास्यायामसमवेतार्थत्वेन त्यज्यते पौर्णमास्यां तु प्रयुज्यते × २

षोमाविदं हविरजुषेतामवीवृधेतां महोज्यायोक्रातामिसवां नरवाकवपंश्रूयते· तत्र पौर्णमास्यामिंद्राग्नी नदेवते इति लिंगात्तत्पदमपनीयते
अमावास्यायां तु समवेतार्थत्वात्तत्प्रयुज्यते· तत्रैवं संदिह्यते· इंद्राग्निपदैकवाक्यतापन्नान्यवीवृधेतामित्यादिपदानि तत्राप्यनेया
नि अथवा प्रयोक्तव्यान्येवेति· तत्र प्रकरणानुयोगः प्रतिभाति· असमवेतार्थतया देवतामात्रस्यापनयनात् वाक्यात्तु तान्यप
नेयानीति प्रतीयते· येन सह यदेकवाक्यतापन्नं तेन सह तदपनयनौचित्यात्· तदनयोर्विरोधः। तत्र प्रकरणमेवांगसंबंध
प्रतिपादकं· अतस्तस्य बलवत्त्वाच्छेषभागः प्रयोक्तव्य एवेति पूर्वपक्षे सिद्धांतः। प्रकरणं विनियोज्यस्वरूपसामर्थ्यमनपेक्ष्य
न विनियोजकं येनैवं नवेत् किंतु तदपेक्षमेव· कथमन्यथा त्रूलोहं देवयज्यया प्रजया पशुभिश्च जनिषीयेति सूक्तानुमंत्रणत
द्देवताविरहिणो दर्शपौर्णमासयोर्न विनियुज्येत· निरूप एवोपसदः साह्नस्य द्वादशाहीनस्य सत्रस्य चैकाहविधेयसोमयाग
स्वरूपे सांगे ज्योतिष्टोमादौ द्वादशोपसत्त्वं नु बोधयति· स पुनर्बहुदिवसविधेयसोमयागरूपाहीननामकक्रतुविशेषं नीय

तदे ३

ते॰अङ्गःस्वःकृताविसन्नुशम्नात्॰स्वरूपालोचनायांतुश्रुत्यालिंगेनवाक्येनच्छितिप्रवृत्तिकेनसमूपमपनीयतेयद्यन्यत्रनीयतेनद्विहायावु
शिष्टेनप्रकरणाकांक्षापूर्यते॰यत्रतुविरोधिश्रुत्यादिकंनास्तितत्रप्रकरणंविनियोजकंयथासमिधोयजतीत्यादिबोधितस्यसमि
दादेः।अत्रतुयथालिंगेनइंद्रादिभागोपनीयतेनथावाक्येनतच्छेषभागोपीतिकर्तव्यात्मवृत्तिकस्यप्रकरणस्यावकाशः।नचत
थात्वमस्यासिद्धंयतोवाक्येपदानांसंबंधःप्रत्यक्षसिद्धःप्रकरणेत्वाकांक्षावशात्कल्पनीयः।तथाचवाक्येप्रथममेवाभिधानसाम
र्थ्यंकल्प्यतेततस्तेनश्रुतिस्तयाविनियोगइतितृतीयःकालोविनियोगस्य॰प्रकरणेतुप्रथमंवाक्ययोःसंबंधःकल्प्यतेततःसा
मर्थ्यंअथश्रुतिःअथविनियोगइतिचतुर्थःकालःततोवाक्यात्प्रथमंशेषभागस्यापनयेसिद्धत्वात्माप्रश्रुतिरकिंचित्करी॰वाक्य
विरोधादिति॰प्रकरणस्यानयोर्यथा॰राजसूयस्यप्रधानानानाकर्मात्मकस्य॰प्रकरणेप्रधानादभिषेचनीयादनंतरंशौनः
शेपोपाख्यानमाम्नातं॰तत्रकिंसमस्तराजसूयेतदंगंआहोस्विदभिषेचनीयमात्रइतिसंदेहः।तत्रप्रकरणस्यबलवत्त्वात्सर्वांग

[illegible]तावगम्यते। स्थानस्य तु बलवत्वे ऽभिषेचनीयांगता। तदनयोर्विरोधः। यद्यप्याकांक्षा समा उभयोरपि तुल्यबलता। अयमेति पुत्रो राज्ञ
इत्यादौ गामानय प्रासादं पश्येत्यादौ उभयविरहे ऽणन्वयावबोधात्। तथापि विनिगमनाविरहात् उभयोस्तुल्यबलताद्विकल्पेनांगता स्थि
तिः पूर्वपक्षे सिद्धांतः। आकांक्षासन्निधी द्वे अपि विनियोगप्रयोजिके इत्युभयसंमतं। एवं च स्येच कथं स्यादित्याकांक्षा ऽन्वियसध्यतियावद
नुवर्तते। सन्निधानं प्राकरणिकत्वेन सर्वदा बुद्धिसन्निहितत्वादस्त्येव। अभिषेचनीये च सत्यपि सन्निधाने आकांक्षा उत्थाप्या। तथा च य
दोत्थिताकांक्षेन प्रकरणेनैकवाक्यत्वं कल्पनीयं तदा सन्निधानादाकांक्षोत्थापनं। तथा चैकवसामर्थ्यकल्पनं श्रुत्युन्नयनं विनियोगः। अ
परत्रैकवाक्यताकल्पनं सामर्थ्योन्नयनं श्रुतिकल्पनं विनियोग इत्येवं विप्रकर्षात् स्थानस्य दुर्बलत्वात् प्रकरणेन सर्वराजसूयशेषे ७२
नःशेपोपाख्यानस्य विनियोगो न तु विकल्प इति। स्थानसमाख्ययोर्यथा। दर्शपौर्णमासप्रकरणे पौरोडाशिकसमाख्याते कांडे सान्ना
य्यक्रमे शुंधध्वं दैव्याय कर्मण इति मंत्रः श्रूयते स च प्रकरणाद्दर्शार्थः। तथात्वे नैस्य समवेतार्थता चिंसात्कस्य चित् शुंधने विनियोगाद्दवेतः

शुंधनीयं चात्र द्रव्यमुपस्थितं सान्नाय्यपात्रं पुरोडाशपात्रं च। तच्च समाख्यावशात्पुरोडाशपात्रशुंधने विनियोगः प्रतिभाति। स्थानवशात्तु सान्नाय्यपात्रा
णां। तदनयोर्विरोधः। तत्र पूर्वः पक्षः। पौरोडाशशब्देन पुरोडाशसंबद्धान्युच्यंते। तान्यधिकृत्य प्रवृत्तं कांडं पौरोडाशिकमिति। अतः समाख्याश्रु
तित एव साक्षाद्विनियोजिका। क्रमस्तु प्रकरणाद्युन्नयनद्वारा तथेति समाख्याबलवतीति। सिद्धांतस्तु पौरोडाशिकपदेन पुरोडाशमंत्र
विशेषयोः संबंधमाह। किंतु पुरोडाशविशिष्टं कांडं वैशिष्ट्यानुपपत्तेस्तु संबंधस्तत्र कल्प्यते। सोऽपि न शेषशेषिभावः। किंतु संबंधमात्रं
तद्द्वारेण तु मंत्रभेदस्यापि तदनुमानं। तथा च समाख्ययापि क्रमादिकमुन्नीय विनियोगो न तु श्रुत्यैव। एवं समाख्यया क्रमोऽनुमेयः। तेन प्रकर
णं तेन वाक्यं तेन लिंगं तेन श्रुतिस्तया विनियोग इति समाख्यायां षष्ठः कालो विनियोगस्य। स्थाने तु क्रमः प्रत्यक्ष एवेति न कल्पनीयः। तथा
च तेन प्र[redacted]थमत एव प्रकरणमनुमेयं तेन च वाक्यं तेन श्रुतिस्तया विनियोग इति पंचमः कालः। तस्मादर्थविप्रकर्षात्समाख्यास्था
नतो दुर्बलेति न पुरोडाशपात्रशुंधनेऽस्य विनियोगः। कथं तर्हि कांडस्य पौरोडाशिकसंज्ञा। पुरोडाशसंबंधिबहुमंत्रपठितत्वादिस

गद्यादौ कदेशि
मतेपि

वेहि· तदयं निर्गलितोर्थः। एकद्वित्रिचतुःपंचवस्त्वंतरयकारितं· श्रुत्यर्थप्रतिवैषम्यं लिंगादीनां [redacted] प्रतीयते· बाधिकैव श्रुतिर्नित्यं समाख्या
बाध्यते सदा· मध्यमानां तु बाध्यत्वं बाधकत्वमपेक्षयेत्यन्यत्र मतिविस्तरेणेति प्रकृतमनुसरामः। पूर्वोक्तदृष्टांतो वैषम्यादप्यनुपपन्नः। तथा
हि· तत्र वेगव्यापारस्य स्वरूपसत एव जनकतया दीर्घत्वं संभवति· अभिधायास्तु ज्ञाताया एवानुकूलता व्यंग्यनिष्ठते मावाज्ञानादित्य
न्विताभिधानवादेपि निःशेषत्यादौ विधेयव्यंग्यत्वमेवेति स्थितं· किंच यदि वस्तुगत्या पदार्थांतरेणायोऽन्वितः सोऽभिधेयोपस्थाप्यतद
सन्विताभिधानं तदावश्यं व्यंजनास्वीकार्या· अन्यथा रुचिं कुर्विसादेः शब्दस्य दुःष्टत्वं न स्यात्· दुष्टिहेतोरसभ्यार्थोपस्थितेस्तदभा
भावप्रसंगात् तदर्थस्यानन्वितत्वात्· किंच· वाच्यवाचकभावातिरेकाद्व्यंग्यव्यंजकभावस्यावश्यं काव्यज्ञदृष्ट्यापि स्वीकर्तव्यं· अ
न्यथा कष्टत्वादयो नित्यदोषा असाधुत्वादयोऽनित्यदोषा इति विभागो न स्यात्· वाच्यस्यार्थस्याविशेषेण कष्टत्वादीनामपि सर्वत्र दुष्ट
त्वस्य वा प्रसंगात्· व्यंजनाभ्युपगमे तु व्यंजनीयस्य बहुविधत्वेन रौद्रादौ व्यंग्येऽनुकूलत्वं शृंगारादौ तु दुष्टत्वमिति युज्यते विभागव्यवस्था

प्रदीपः
६९
69

एवंपर्यायेषु मध्ये कस्यचिदेव कुत्रचित्काव्यानुगुणत्वमित्यपि व्यवस्था नस्मात्· वाच्यार्थस्याविशेषात्· दृश्यते चासौ· यथा· द्वयं गतं संप्रति शोचनी
यतां समागमप्रार्थनया कपालिन इत्यादौ न पिनाकादिपदमनुकूलं किंतु जुगुप्साव्यंजकत्वात्पिनाकादिपदमेव·· ननु द्वयमेवमप्येतद्
युक्तं· व्यंग्यत्वेनाभिमतस्य वाच्यत्वस्वीकारे एवानुकूलत्वप्रतिकूलत्वयोर्व्यवस्थोपपत्तेरिति चेन्न· अभिधाग्रहे स्वीकारे संकेतग्रहं वि
ना तदनुपस्थितिप्रसंगस्योक्तत्वात्· किंच· काव्ये शास्त्रे वा वाच्यव्यंग्ययोः प्रतिपत्तिहेतुव्यापारभेदनिबंधनो भेदोऽवश्यं स्वीकर्तव्यः
वैधर्म्यदर्शनात्· वाच्यो ह्यर्थः सर्वैरेकरूप एव प्रतीयत इति नियतः· व्यंग्यस्तु वक्तृप्रकरणादिवशादनियतः। तथा हि· गतोऽस्तमर्क इति
वाक्ये राज्ञः सेनापतीन्प्रति शत्रूणां हठेनावमर्दनावसर इति· दूतीनामभिसारिकाः प्रति अभिसरणमुपक्रम्यतामिति· सख्या वास
कसज्जां प्रति प्राप्तस्ते प्रेयानिति· आप्तस्य कार्यवशेन बहिर्गच्छतः प्रति दूरं मागा इति· गृहिणो गोपालकं प्रति सुरभयो गृहं प्र
वेश्यंतामिति· दिवसेऽतिसंतप्तस्य बंधून्प्रति संतापोऽधुना न वर्तत इति· आपणिकानां भृत्यान्प्रति विक्रेयवस्तूनि संगृह्यं

शिवः
६९

तामिति· नायकागमनप्रस्तावे प्रोषितभर्तृकायास्तु कथकं प्रतिनागतोऽयं प्रेयानिति· एकस्मैव वस्तुन्यतितरां त्यकरणवशादेवमादिरनवधिर्व्यंग्योऽर्थः प्रका
श्यते· वाच्यस्तु सर्वान्प्रत्यविशिष्ट एव· ननु नैतद्वाच्यवैधर्म्यं· नानार्थसैंधवादिपदेनानार्थावगतिदर्शनादिति चेन्न· एकवाक्यवर्तिनस्तस्या
प्यर्थैक्यनियमात्· यदग्रे वक्ष्यति· लक्षणीयार्थस्य नानात्वेप्यनेकार्थपदाभिधेयवन्नियतत्वमेवेति· तथापि प्रकृतलवणाद्यधिकारिणः प्रति
सकलस्वामिनः सैंधवमानयेति पदप्रयोगस्तत्रानियतत्वं दुर्वारमिति चेन्न· तात्पर्याज्ञानात्· न ह्यत्र सर्वैर्वाच्यैः समं सर्वव्यंग्यानां भेद
:प्रतिपाद्यते किंतु गतोस्तमर्क इत्यस्य वाच्यव्यंग्ययोस्तथा च तद्वाच्यस्यानियतत्वं तदर्थपुरस्कारेणैव सर्वेषां व्यंग्यस्यापि प्रतीतेः· न दयं नि
यतत्वानियतत्वरूपविरुद्धधर्मसंसर्गोऽभिहितः। एवं विलक्षणस्वरूपकालादिभेदोपि भेदको द्रष्टव्यः। वैधर्म्यसत्वेपि यद्यभेदः स्यात्तदा नी
लानीलादेरपि न कश्चिद्भेदः स्यात् वैधर्म्यस्याविशेषात्· यदुक्तं· अयमेव भेदो भेदहेतुर्वा यद्विरुद्धधर्माध्यासः कारणभेदश्च· सुप्र
द्धश्च न त्वत्र तत्र स्वरूपभेदः। तत्र निःशेषेत्यादौ· मात्सर्यमुत्सार्य विचार्य कार्यमार्याः समर्यादमिदं वदंतु· सेव्या नितंबाः खलु भूधराणा

=अयमेवेति· ज्ञानयोर्धर्मैर्वान्योन्याभाव इति मतेनेदं· २ — कारणभेदश्च विरुद्धधर्मरूपभेदस्य हेतुः। २ =

प्रदीपः
७०
70

मुतस्मरस्मेरविलासिनीनामित्यादौ॰ कथमवनिपदर्पो यन्निशातासिधारादलनगलितमूर्ध्नां विद्विषां [illegible] स्वीकृता श्रीः। ननु तव निहतारेरप्यसौ
किं न नीता त्रिदिवमपगताङ्गैर्वल्लभा कीर्तिरेभिरित्यादौ च स्वरूपभेदः। प्रथमे हि वाच्यो निषेधरूपः व्यंग्यस्तु विधिरूपः। द्वितीये वाच्यः संशयरू
पः। व्यंग्यस्तु शांते शृंगारिणि वाभिकारिणि तदुचितैककोटिनिश्चयरूपः। तृतीये वाच्यो निंदारूपः प्रतीयमानस्तु स्तुतिरूपः। कालभेदस्तु
सर्वत्र॰ पूर्वं वाच्यः प्रतीयते पश्चात्तु व्यंग्य इति॰ वाच्यस्य शब्दमात्रमाश्रयः प्रतीयमानस्य तु पदशब्दैकदेशीभूतकाकादितदर्थवर्णसंघ
टनाद्याश्रयभेदः। वाच्यस्य व्याकरणकोशादिमात्रेणावगमः। प्रतीयमानस्य तु प्रतिभानैर्मल्येनाप्यधिकेनेति ज्ञापकभेदः। वाच्येन तु
तन्मात्रस्य प्रतीतिमात्रं॰ अन्येन विदग्धपदवा — — सहृदयस्य चमत्कृतिरिति कार्यभेदः। गतोस्तमर्क इत्यादौ दर्शितनयेन वाच्य एक
ःप्रतीयमानस्तु नानेति संख्याभेदः। कस्स ण व होइ रोसो दट्ठूण पिआइ सव्वणं अहरं। सभमरपउमग्घाइ ऌणिवारियवामे सहु
सु एहिं॰ इत्यादौ वाच्यार्थस्य संबोध्यासखीविषयः। तत्र हि वाच्योर्थः श्रोतुर्यव तिष्ठते॰ प्रतीयमानस्य तु॰ भ्रमरेणास्या अधरः खंडितो शिवः
७०

नतूपपत्तिनेतितत्कांतः ममैव वैदग्ध्यमित्यस्य प्रतिवेशिनीत्वदं मयासमाहितं पुनरेवं तत्पानविधेयमित्यस्योपपत्तिः। एवं स्वपत्न्यादिविषयेपीति वि
षयस्य भेदः। एवं स्वरूपादिभेदादवश्यमंगीकर्त्तव्यो वाच्यव्यंग्ययोर्भेदः। किंच वाचकव्यंजकयोरपि वैधर्म्याद्भेदो वक्तव्यः। यतो वाचकस्य सं
केतितार्थापेक्षा संकेतित एव ह्यर्थेऽभिधा प्रवर्त्तते न तथैवं व्यंजकः। अन्यथापि व्यंजनप्रसंगजनने नाहं यज्ञोक्तं तात्पर्यविषये शब्दः प्र
माणमिति तद्दितोप्यनुपपन्नं यतो व्यंग्यस्य वाच्यतानभ्युपगमेपि नानार्थानामपेक्षा तात्पर्यादेव नियमो वाच्यः। अन्यथा सर्वत्र सर्व
व्यंग्यप्रतीतिप्रसंगात्। तथा च यत्र वाणीरकुडंगे साक्षी व्यंग्यप्रतीतावपि वाच्य एव चारुत्वविश्रामस्तत्र तात्पर्यविषयो व्यंग्योर्थः कथं प्र
तीयेत। यत्परः शब्दः स शब्दार्थ इत्येतत्तु सुतरां। एतेन तात्पर्यमिव व्यंग्यप्रतीतौ व्यापार इत्यपि निरस्तं। तस्मात्तात्पर्यमभिधावान प्रतीयमाने
र्थे व्यापारः। नन्वस्तु लक्षणा। न हि वाच्यवल्लक्ष्योपि यथावस्थितः विशेषव्यपदेशहेतुर्वा। यतो रामोस्मि सर्वं सह इत्यत्र रामपदेन सर्वदुःख
भाजनत्वं प्रसारव्यानरुचेः कृतं समुचितं क्रूरेण तेरक्षसा सोढं न च तथात्वया कुलजनो धत्ते यथोच्चैः शिरः। व्यर्थं संप्रति विभ्रता ध

प्रदीपः तदन्यः शक्यान्यः भाक्तमार्गः लाक्षणिकमार्ग इत्यर्थः =२

इदं निःशेषत्वस्याप्युपलक्षणम् - व्यंग्यत्वाभिमतेपि =२

तु रिदं त्वधापदः साक्षिणा रामेण प्रियजीविते न तु कृतं प्रेम्णः प्रियेनोचितमित्यत्र कातरत्वं रामोऽसौ भुवनेषु विक्रमगुणैरित्यत्र खरदूषणादिहं

७१ 71 तृत्वं च लक्ष्यते तो रामपदस्य लक्ष्यतावच्छेदको भवति अर्थान्तरसंक्रमितवाच्यादिविशेषव्यपदेशहेतुश्च भवति एवमन्यत्रापि स्यात् न तदुक्तं [illegible]

भाक्तमार्गस्तदन्य इति लक्षणीयविशेषावगमश्च प्रकरणादिसापेक्षेण शक्यार्थेन स्यादतो नास्त्यतिरिक्तः प्रतीयमानो नाम मैवं लक्ष

णीयस्य नानात्वेपि हि नानार्थसैंधवादिपदाभिधेयस्येव नियतत्वमेव न खलु नियतसंबंधो मुख्येनार्थेन लक्षयितुं शक्यते प्रती

यमानस्तु प्रकरणादिविशेषेन नियतसंबंधोऽनियतसंबंधः संबद्धसंबंधश्चेति तत्त्वरूपं सोदाहरणमग्रे प्रदर्शयिष्यते किं च अत्ता

एत्थ णिमज्जइ इत्यादौ विवक्षितान्यपरवाच्ये कथं लक्षणा मुख्यार्थबाधाभावात् ननु तत्रापि तात्पर्याधीनान्वयानुपपत्तिः छत्रि

णो यान्तीत्यत्रेवेति चेन्न लक्षणायां प्रयोजननियमात् तस्य च व्यापारान्तरगम्यत्वात् तदर्थं व्यंजनास्वीकारे किं प्रथम

या पि लक्षणया अथ निरूढलक्षणाभिवान्यत्रापि स्तु प्रयोजनानपेक्षेति चेन्न यथा हि संकेतग्रहसापेक्षाभिधा तथा मुख्यार्थबाध शिवः

न

एकस्मिन्नेव वाक्ये इति शेषः व्यंग्यस्य त्वेकत्रैव वाक्ये गतोऽल मित्यादावावृ त त्त्यत्वमुदाहृतम् =४

[illegible]

७१

तथाचान्यतरानुसारित्वनियमादन्यतरस्यैव व्यंजनानुव्याप्तिरित्यर्थः २

तत्रस्थलगेत्यर्थः २ मुख्यार्थबाधप्रतिसन्धानदशायां चास्योपयोगः १ लक्षणानुगमोपि क्वचिन्नास्तीति सुतरां भेदरूत्या हनाकीर्ति २

व्यञ्जस

तद्योगरूढिप्रयोजनान्यतरस्य मुख्यार्थसंकेतग्रहस्य च सापेक्षा लक्षणा तत्कथं रूढेः प्रयोजनस्य वाभावेपि भवेत् यतः संकेतग्रहसापेक्षा लक्षणा अत एवाभिधापुच्छभूता सेत्याहुः किंच लक्षणाव्यंजनयोरभेदः लक्षणानुपजीव्य तद्दर्शनात् नापि लक्षणानुगतमेव ध्वननमिति ध्वनेस्तल्लक्षणमिति वाच्यं अभिधोपजीवनेनापि भावात् न च लक्षणाभिधोभयानुसारानुसार्येव वर्णमात्रानुसारेणापि दिदृक्षयेतरसादिव्यंजना न च वर्णमात्रेभिधा लक्षणा वा नापि शब्दानुसार्येव विकसन्नेत्रकीनेत्रत्रिभागावलोकनादिगतत्वेनापि प्रसिद्धेः तस्मादभिभिधालक्षणातात्पर्यविलक्षणस्तुरीयो ध्वननव्यंजनद्योतनप्रकाशनादिपर्यायो व्यापारोऽनपह्नवनीय एव तत्र अत्ता एत्थ णिमज्जइ इत्यादौ व्यंग्योर्थो नियतसंबंधः नियतसंबद्धत्वं च वाच्यव्यंग्यप्रतीत्योरेकविषयतात्मकत्वं प्रथमे तस्य भावः पथिकरूपैकविषयकत्वात् द्वितीये तु तदभावः सखीतत्कांतादिविषयकत्वादिति केचित् तन्न सम्यगाभाति लक्ष्यस्य नियतसंबद्धत्वमेव व्यंग्यस्य तु तथात्वमन्यथात्वं चेति पूर्वं प्रतिपादितस्य हीदमुदाहरणमिति लक्ष्यसाधारणं नियतसंबद्धत्वं वाच्यं न चोक्तं तथा भवति अन्ये तु प्रथमे सर्वे

एकसंबन्धित्वप्रकारकेच्छाविषयत्वमित्यर्थः

तत्र नियतसंबन्धादिषु मध्ये

लक्ष्यप्रतीतिस्थले वाच्यस्य बाधात्प्रतीतेः १

प्रदीपः
७२
72

सर्वेषामेव सत्यताप्रतीतिः द्वितीये तु कांतस्यैव सत्यं तथान्येषां त्वसत्यतयेति नियतानियतसंबद्धत्व [illegible] मित्याहुः। तदपि न मनोरमं। यत एवं वाच्यप्र
तीतिरेव सत्यत्वासत्यत्वप्रतीतिविषयत्वरूपं वैलक्षण्यमात्रमुच्यते न तु व्यंग्यप्रतीतेः तस्मान्नियतसंबद्धत्वं। तेन वाच्येन सह ज्ञाप्यत्वरूपसंबं
धइति युक्तमुत्पश्यामः। संबद्धसंबद्धो यथा। विवरीअरएन्तछीवम्हे दहूण णाहिकमलट्ठं। हरिणो दाहिणणअणं रसाउला झत्ति ढकेई। अ
त्र हरिपदेन दक्षिणनयनस्य सूर्यात्मकत्वं तन्निमीलनेन सूर्यास्तमयस्तेन पद्मसंकोचस्तेनोभ्रमणः स्पगनं तस्मिन्सति गोपनीयस्यां
गस्यादर्शनेन निर्यंत्रणं निधुवनविलसितमिति संबद्धसंबद्धाभिधेयं ते। वेदांतिनस्तु क्रियाकारकादिपुरस्कारेण शाद्वानां प्र
वृत्तिर्धर्मिभावे पुरस्कृत्य न संभवति। धर्मधर्मिभावस्य प्रपंचगोचरेवास्यात्र ब्रह्मगोचरो वा। नाघुः। प्रपंचस्य बाध्यत्वात्। नांत्यः। ब्र
ह्मणो धर्मशून्यत्वात्। अतः पदपदार्थविभागमंतरेणैव सत्यं विज्ञानमित्यादिवाक्यम खंडब्रह्मवाचकमित्याचिष्टंते। अन्यस्त
न्मतानुसारेण प्रतीयमानेपि वाच्यस्य शक्तिरेवेत्यपिन [illegible] वाच्यं। यतो व्यवहारमार्गे तैरपि पदपदार्थकल्पना ऽदर्शपसंगीकर्तव्या।

प्रवृत्तिः
वाक्यार्थबो
धकता = २
अपुरस्कृत्य
अनादृत्य = २

शिवः
७२

= वाध्यत्वादिति। तथा च मर्थस्य
= अमरंवडार्थत्व शोध्यमसंज्ञानमित्यादिनत्वभावोयानापनिरितिभावः। ३ = अखंडमेवेति [illegible] प्रकारसंसर्गाघित [illegible] निर्धर्मकं अखंडं ब्रह्मैवेतेसमर्थाः। २ = अतइति। स्वयं हि वेदांतिमतेवाक्यमु
मितिभांतस्य शंका। नैर्लक्षण्याएवागीकरणत्व। वस्तुतस्तु पैच्याकुर्दिसादिहतिरयावाक्यस्यापगीकार्य। वैयाकरणमताभिप्रायेण। पदाह इति। प्राकीणाच्यादिमानास्तिकाश्च ब्राह्मणकथनं देवदत्तादेमाद्यो वाक्यमेनथैव स्फुरनर्थकाश्रनि। अविद्यापरे

=नानियतात् न व्याप्तत्वातिरिक्तसंबंधवतः अनिबद्धरूपादिति प्रति नियतो बंधः अतिबंधो व्याप्यभावरूपः संबंधस्तस्य ... दित्यर्थः ॥ ४=

अभिं बद्धएवेति पदद्वयात्पादिस ... कृतवाक्यबोध्यार्थेनेति ... =२

व्यवहारे तेषां भट्टनयस्वीकारात्. यदि च पदपदार्थकल्पनाऽविद्यादशायामपि नांगीक्रियते कुतस्तर्हि सुलभव्यवहारः. वाक्यार्थ एव वाक्यस्य संकेत
ग्रहमाश्रीयत इति चेन्न. वाक्यार्थस्यापूर्वत्वेनानंत्याच्च संकेतग्रहस्याशक्यत्वात्. अविद्यामार्गतिरस्कारे च कथमखंडयोरपि वाच्यवाचकभाव
: पारमार्थिकभेदाभावात्. तस्मात्तन्मतेऽपि विध्यादिर्व्यंग्य एव. महिमभट्टस्तु. न तावदसंबद्ध एव वाक्यात्प्रतीयते सर्वस्मात्सर्वोपलब्धिप्र
संगात्. संबंधाच्च व्यंग्यव्यंजकभावो भवन्नियतो भवतीति प्रतिबद्धरूप भवतीत्युपेयं. संबद्धेन तस्याधिकरणत्वेनाज्ञानेन व्यंग्यं प्रतिपा
दयति सर्वं च न प्रतीतिप्रसंगात्. एवं च व्यंग्यव्यंजकभावो नुमापकभावोऽनुमान एव पर्यवसन्नः. यतो व्याप्तत्वेन सकलपक्षनिष्ठत्वेन च सपक्ष
सत्त्वविपक्षासत्त्वपक्षसत्त्वलक्षणरूपत्रयवतो लिंगाल्लिंगिज्ञानमेवानुमानं यत्त्रिरूपमिति. तेनानुमानेन रूप्यते न त्वतिरिक्तया व्यक्त्येति
हितस्यार्थः. एवमनुमानादेव व्यंग्यप्रतीतिः. तथा हि. भवधम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ तेण. गोलाणइकच्छकुडंगवासिणा द
रिअसिंहेण. संकेतनिकेतनीभूतगोदावरीतीरनिकुंजपुष्पावचयादिहेतोः कदाचित्संचरतो धार्मिकस्य निवारणाय विनयवत्या इयमु

व्यंग्यव्यंजकयोर्भावः व्यंग्यप्रतीतिरूपः =४

एवमनुमानादिति प्रागुक्तप्रकारेव तदित्यर्थः =२

अनुमापकत्वेन व्यपदिश्यते न तु व्यंजकतयेत्यर्थः

अनुमानेन अनुमितिपा(छर) रूप्यते विषयीक्रियते न त्वतिरिक्तव्यक्तिजन्यज्ञानविषय इत्यर्थः =२ उ

प्रदीपः

७३

व्यापकविरुद्धो व्यापकाभावः = २ प्रमा

प्रतीतेरिति ध्वनिरत्ने भ्रमणहेतुत्वोपमा... या भयहेतुध्वनिरत्नुपलब्धेः कार्यं भ्रमणं ... प्रतीत्या तोपकत्वप्रतीतिरित्यर्थः अत्र चोपलब्धिचिदमनुपलभ्यमान

निकुंजेः पतुः

क्तिः। तदत्र निकुंजवासिसिंहकृतया ध्वनिवृत्त्यागृहे भ्रमणविधिर्बाध्यः। स एव निकुंजभ्रमणायोग्यत्वमित्येवं प्रभवति। यद्वीरुभ्रमणं तत्र भयकारण

निवृत्त्युपलब्धिपूर्वकं लिंगं च सिंहोपलब्धिरिति व्यापकविरुद्धोपलब्धौ पर्यवसानात्। भ्रमणस्य व्यापकमभयकारणाभावोपलब्धिः प्रतीते

र्विरुद्धं यद्भयकारणं तदुपलब्धेः। यथा नात्र तुषारस्पर्शः वह्नेः। अनुमानं चैवं। गोदावरीतीरं भीरुभ्रमणयोग्यं सिंहवत्वादिति। अत्रो

च्यते। श्वभीरोः वीरस्वभावस्य भ्रमणयोग्यत्वमात्रमत्र साध्यं वीरस्वभावस्य चाविशेषाद्दोदासीन्येन तत्सामान्यमेव वा। आपेय्य भिचार

ः तादृशस्यापि प्रभोर्गुरोर्वा निर्देशेन प्रियानुरागेण निधिलाभादिशंकया वा भ्रमणदर्शनात्। अत एव नांत्योपि। मध्यमे तु विरोध

ः। स्पर्शादिशंकया अपौरुषेयतया वा श्वतो बिभ्यतोपि मृगयादिकुतूहलेन सिंहवद्देशे वीरस्य भ्रमणात्। किं च। पक्षे सिंहसद्भावो

मानांतरेणावधारितः। न च तद्वचनं निश्चायकं। अर्थेन समं संबंधो नियमादिसन्निश्चयरूपासिद्धेः। एवं निःशेषच्युतेत्यादौ चंद

नच्यवनादीनि उपभोगव्यंजकतयोपात्तानि। न च तानि तद्व्याप्यानि। कारणांतरेपि संभवात्। अत एवात्र स्नानकार्यत्वेनोपात्तानि।

शिवः

७३

न चूतानि तन्त्राण्यानि· कारणांतरेऽपि संभवात्· अत एव च स्थानकार्यत्वेनोपात्तानि· अतोऽनैकान्तिकत्वात्कथमनुमितिः स्यात्· ननु व्यक्तिरपि क-
थं नैरिति चेत्· अधमपदस्य हित्यादिति भ्रमः॥ अस्माकमपि तत्त्वाहित्येनानैकान्तिकताया[illegible]तिरकड्ति चेत्· भवेदप्येवं· यद्यधमत्वेन
भ= माणैर्वधारितं भवेत्· न त्वेवमस्ति· व्यक्तिरपि कथं तादृशा[illegible]दृवेदिति चेत्· धिङ्मूर्ख· व्यंजनायां न व्याप्तेर्न वा पक्षधर्मताया निर्धार-
णमंग· किंतु संभावितादप्येवं विधोऽर्थः प्रतीयत इति मूकीभव·॥ ॥इति श्रीमहामहोपाध्यायश्रीगोविन्दठक्कुरकृते काव्यप्रदीपे गुणीभू-
तव्यंग्यभेदनिर्णयो नाम पंचम [illegible] उल्लासः॥ ॥एवं गुणीभूतव्यंग्यप्रभेदे निर्णीते चित्रभेदं दर्शयितुमवसरः। तत्र यद्यपि शब्दचित्रार्थरू-
पचित्रभेदद्वयं प्रथमोल्लास एव प्रदर्शितं तत्प्रभेदाश्चालंकारप्रभेददर्शनेनैव प्रदर्शिता भविष्यंतीति न किंचिदत्र प्रदर्शनीयं तथा-
पि प्रदर्शितभेदद्वयमेव तावदनुपपन्नं· शब्दार्थालंकारयोरन्योन्यनैरपेक्ष्येणानुपलंभनात् उपलंभेऽपि वा नयसंसृष्टवेततीयभेदप्रसं-
गादिति तदुपपादयति· शब्दार्थचित्रं यत्पूर्वं काव्यद्वयमुदाहृतं· गुणप्राधान्यतस्तत्र स्थितिश्चित्रार्थशब्दयोः॥ शब्दार्थालंकारयोरे-
=नैरपेक्ष्येणेति· परस्परासंकीर्णत्वेनेत्यर्थः॥ स्वच्छंदेत्यादावितरनिरपेक्षयाप्यनिर्वाणालंकारस्यादिनिर्गतमित्यादौ [illegible]मानस्मात्मेतिसंभ्रमेऽप्यनुप्रासस्य च सत्त्वादिति भावः॥२=

=प्राधान्येति॰ आत्मभाविकदिसंबंधविषयत्वंच प्राधान्यमितिभावः।१८= वामइति॰ प्रथमतः शब्दालंकारेणविनाकार्थालंकारप्रतीतिसनंतरमर्थालंकारप्रतीतिरितितेषांवाह्यत्वमितिभावः।१९= तदेनशुक्रिति॰ स्वतरवशब्दालंकाराणांचमतात्विमर्थाशुभानिनर्थालंकारेणनेदृ

प्रदीपः

७४

७५

कैकमात्राव स्थानपुरस्कारेण न किंतु प्राधान्य पुरस्कारेण तथा च न काचिदनुपपत्तिरिति भावः। ननु तथापि विभागोनुपपन्न एव यतः केचिच्छ
ब्दालंकारमात्रं केचिच्चार्थालंकारमात्रमुरीचक्रिरे॰ तत्कस्य मतमाश्रित्य विभाग इति चेत्‌॰ सत्यमेव केचित्तु भयांगीकारिणः। तथा चोक्तं॰ रूप
कादिरलंकारस्तस्यान्यैर्बहुधोदितः। न कांतमपि निर्भूषं विभाति वनितामुखं॰ रूपकादिमलंकारं बाह्यमाचक्षते परे॰ सुपां तिङां च
व्युत्पत्तिं वाचां वांछंत्यलंकृतिं॰ तदेतदाहुः सौशब्द्यं नार्थव्युत्पत्तिरीदृशी॰ शब्दाभिधेयालंकारभेदादिष्टं द्वयं तु न इति॰ अस्यार्थः। अर्थ
स्यैव विभावादिरूपत्वेन रसव्यंजकत्वात्तन्निष्ठो रूपकादिरेवालंकारः कैश्चिदुक्तः। केचित्तु काव्यस्यालंकारो वाच्यः काव्यं च कविकर्म श
ब्द एवेति तदाश्रितास्सुप्तिङंत विशिष्टोत्पत्तिरलंकारः रूपकादिस्तदर्थाश्रितोऽलंकारो बाह्यः अलंकारशब्दप्रयोगस्तु तत्र गौण एवेति व्युत्पत्ति
रेव कथं नार्थालंकार इत्यत आह॰ तदेतदाहुरित्यादि॰ शब्दाभिधेयेति॰ शब्दवदर्थस्यापि केचित्संस्कारं मन्यत्वमर्थस्येव शब्दस्यापि रसप्र
तीत्युपयोगित्वमतउभयाश्रितोप्युभयरूपोलंकार इति॰ तत्र शब्दचित्रं यथा॰ प्रथममरुणच्छायस्तावत्ततः कनकप्रभस्तदनु विरह

शिवः

७४

=प्रधानमिति-तासिद्धिरेतावेकस्मिन्नत्रान्यतरालंकारं भवेद्यः समुच्चयोऽसाविति समुच्चयलक्षणं-तेनयथातेकुटिलमानसजंनितथाकालतामपीसमर्लिंकारस्यतस्प्राधान्यंश्लेषोपमयोरङ्गत्वं-४=

ताम्बूलन्वीकपोलतलप्रभः। उदयति ततो ध्वांतध्वंसक्षम [illegible]ः क्षणदामुखे सरसबिसिनीकंठछेदच्छविर्मृगलांछनः। अत्रार्थालंकारउपमागुणी भूताशब्दालंकारस्त्वनुप्रासः प्रधानं आसमाप्ति कवेस्तत्रैव संरंभात् प्राधान्यस्य कविविवक्षामात्रनिबंधनतात्- अर्थचित्रं यथा- तेदृष्टिमात्रपतिता अपिकस्यनात्रक्षोभाय पक्ष्मलदृशामलकाः खलाश्च- नीचाः सदैव सविलासमलीकलग्ना ये कालतां कुटिलतामिव न त्यजंति- अत्र शब्दालंकारोनुप्रासः सगुणीभूतः अर्थालंकारस्तु समुच्चयः प्रधानं- आरंभादासमाप्तितन्निर्वाहणात्- यथा चात्र किंचिद्व्यंग्यसत्वेप्यधमकाव्यत्वं तथोक्तं प्रथमोल्लास एव- एषां भेदाश्चालंकारभेदाः भवंती सलंकारनिर्णयेनैव ते निर्णेष्यंते-॥ ॥इति श्रीमहामहोपाध्यायश्रीगोविंदठक्कुरकृते काव्यप्रदीपे अवरकाव्यप्रभेदनिर्णयो नाम षष्ठउल्लासः॥ ॥एवं धर्मिणि काव्ये सप्रभेदे निरूपिते प्राप्तावसरतया दोषाभावादीनि लक्षणस्थानि विशेषणानि विवेचनीयानि तेषु च दोषाभावः प्रधानं सति दोषे गुणादेरप्यकिंचित्करत्वात्- यदाहुः-स्याद्वपुः सुंदरमपि श्वित्रेणैकेन दुर्भगमिति- सति तु दोषाभावे गुणादिकं विनापि किंचिदाह्लादसंभवात्- अपदोषतैव विगु

प्रदीपः
७५
75

णस्य गुण इति न्यायात्। अतः प्रथमं तस्मिन्निरूपणीये। भावस्य स्वरूपतो निरूपणं न हि तथा प्रतियोगिनिरूपणाधीननिरूपणीयत्वाच्चापरिचयेन
ज्ञानासंभवाच्च दोषा निरूपणीयाः। न च सामान्ये विज्ञाते विशेषे जिज्ञासेति तत्सामान्यलक्षणमाह। मुख्यार्थहतिर्दोषो रसश्च मुख्यस्तदाश्र-
याद्वाच्यः। उभयोपयोगिनः स्युः शब्दाद्यास्तेन तेष्वपि सः॥ मुख्यस्यार्थस्य हतिर्यस्मादिति व्यधिकरणबहुव्रीहिः। करणसा-
धनो हतिशब्दः। रसे कथं मुख्यत्वमर्थस्य न शक्यं तल्लक्षणं येनार्थासंगतिः स्यात् किंत्वन्यदित्याह। रसश्च मुख्य इति। रस्यत इति व्युत्पत्त्या रस-
शब्देन भावादिरप्युपसंगृह्यते। नन्वेवं नीरसेषु न कश्चिद्दोषः स्याद्विभावाद्यभावादित्यत आह। तदाश्रयाद्वाच्य इति। आश्रयणमाश्रय-
स्तद्भावचनेन रसेनाश्रयणादुपकारित्वेनापेक्षणाद्वाच्योऽपि मुख्य इत्यर्थः। न चैवं मुख्यशब्दार्थस्य नानात्वेनाननुगमः काव्यप्राधान्येनो-
द्देश्यवतीति विषयत्वेनानुगमात्। तदेवं रसवति सर्व एव दोषा नीरसे तु अविलंबितचमत्कारिवाक्यार्थप्रतीतिविघातका एव दो-
षा इति मन्तव्यं। नन्वेवं तयोरेव दोषाधारत्वमुचितं न तु शब्दादीनामित्यत आह। उभयोपयोगिन इत्यादि। अत्र शब्दपदं शब्द्यते बोध्यते

शिवः
७५

नेनेति मुख्यस्याप्रतिपादनात्मकशब्दव्यापारवतोः पदवाक्ययोर्वर्त्तते तेनाद्यपदाद्दुर्गरचने संगृहीते इति प्रकाशकारः। स्वरसः। न च तत्र वीजा
भावः। अन्यथा वर्णस्यापि शब्दपदेनैव प्राप्तौ शब्दाद्या इति बहुवचनासंगतेः। स्यादेतत्। रहतिर्विनाशः। न च दोषेण रसो नाश्यते। तस्माद्
लक्षणमेतत्। मैवं। रहतिशब्दस्यापकर्षवाचित्वात्। नन्वेवं रसानुसन्धिप्रयोजके [illegible]व्याप्तिः। अ[illegible]थानुसन्धिरेव रहतिशब्दार्थः। न हि यत्र र
स उत्सर्पत एव परं त्वपकृष्यते न तत्राव्याप्तिः। न देतल्लक्षणमतिदरिद्रदंपत्योः कृशतरनिशावगुंठनीयवसनमिवैकेनापकृष्यमाण
मपरं हरति। किं चार्थरूपस्य मुख्यार्थस्यानुसन्धिरपकर्षो वा न दोषाधीन इति। अत्र क्रमः। उद्देश्यप्रतीतिविघातलक्षणोपकर्षो ह
तिशब्दार्थः। उद्देश्या च प्रतीतीरसवस्तुविलंबिना अनपकृष्टरसविषया च। नीरसे त्वविलंबिना चमत्कारिणी चार्थविषया। तथा च
तादृशप्रतीतिविघातकत्वं सर्वेषामविशिष्टं। यतो दुष्टेषु क्वचिद्रसस्याप्रतीतिरेव। क्वचित्प्रतीयमानस्याप्यपकर्षः। क्वचित्तु विलं
बः। एवं नीरसे क्वचिदर्थस्य मुख्यभूतस्याप्रतीतिरेव क्वचिद्विलंबेन प्रतीतिः क्वचिदचमत्कारितेत्यनुभवसिद्धमित्युद्देश्यप्रती

= [illegible]क्तिः अपकर्षस्तु रसापचयपिलम्बेतत्यस्यानंदांशोजेशेन [illegible]तितावदरएलोमितिबोध्यं। १८

अनुत्पादो व्यक्त एव·तद्विधानकता च कस्यचित्काङ्क्षा यथा रसदोषाणां·कस्यचित्सरं परस्य·यथा शब्दार्थदोषाणां·तेष्वपि कस्यचिदर्थोपस्थिते
रभावात्·यथा असमर्थत्वादेः।कस्यचिन्न विलंबात्·यथा निहतार्थत्वादेः।कस्यचिद्वाक्यार्थबोधाभावात्·यथा च्युतसंस्कृतत्वादेः।कस्यचि
त्तत्र विलंबात्·यथा क्लिष्टत्वादेः।कस्यचित्सहृदयवैमुख्यव्यग्रतापादनेन·यथा निरर्थकत्वादेः।कस्यचिद्विरोधोपस्थापनेन विपरी
तोपस्थापनेन वा·यथा विरसविरुद्धमतिकृत्त्वादेरित्यापूहनीयं·विधानकत्वं च कस्यचिज्ज्ञातस्य·यथा व्याहतत्वादेः।कस्यचिन्नु स्वरू
प सत एव·यथा निहतार्थत्वादेः।स चायं द्विविधो नित्यश्चानित्यश्च·तत्रानुकरणादन्येन प्रकारेण समाधातुमशक्यो नित्यः।यथा च्युत
संस्कृत्यादिः।अन्यादृशस्त्वनित्यः।यथाप्रयुक्तादिः।अथ विशेषलक्षणानि वक्तव्यानि·तत्र द्विधोप्ययं त्रिविधः।शब्ददोषोऽर्थदोषो रस
दोषश्चेति·तत्र शब्दार्थरसानां यथापूर्वमुपस्थितिः प्राथमिकीति तत्क्रमेणैव दोषभेदा निरूपणीया इति शब्ददोषाणां प्राथम्यं·शब्दस्तु द्वि
धा·पदं तदेकदेशो वाक्यं च·एवं च तदाश्रितः शब्ददोषोपि त्रिविधः।तत्र पदानां वाक्यघटकत्वेन प्राथम्यात्प्रथमं तद्दोषनिरूपणमिति प

रमार्थः। तत्रैकदेशं क्लेते एवं पदैकदेशस्य पदापेक्षयापि प्राथम्यात्तद्दोषनिरूपणस्यैव प्राथम्यमर्हतीति। अयमाशयः। सत्यमुच्यते परं तु पददोषेष्वेव
केचिद्यथासंभवं पदैकदेशदोषा इति समादधते। तन्नातिमनोरमं। अस्त्वेवं तथापि पदैकदेशदोषत्वेन प्रथमाभिधानापादने किंतु नरमि
ति। वयं तावल्लोकप्रथामः। उपदेशे तावत्प्राथम्यादिविचारणा। अतिदेशस्तूपदेशानन्तरमेव। न च पदैकदेशदोषोपदेशः। तेनैव तल्लाभे दे॰
नातिदेशात्। न च पदैकदेश एवास्तूपदेशः पदे त्वतिदेश इति वाच्यं। पदैकदेशवृत्तीनामपि केषांचित्संदिग्धत्वेन तदंशोपदेशस्याव
श्यकत्वादिति। पददोषविशेषलक्षणमाह। दुष्टं पदं श्रुतिकटु च्युतसंस्कृत अप्रयुक्तमसमर्थं निहतार्थमनुचितार्थं निरर्थकमवा
चकं त्रिधाश्लीलं संदिग्धमप्रतीतं ग्राम्यं नेयार्थमथ भवेत् क्लिष्टं। अविमृष्टविधेयांशं विरुद्धमतिकृत्समासगतमेवं। दुष्टं पदमिति
प्रत्येकमभिसंबध्यते। ननु श्रुतिकटुप्रभृतिशब्दानां लक्षणपरत्वे विभागपरत्वाभावात्लक्ष्यानुपस्थितौ कथं लक्षणवाक्यत्व
निर्वाह इति उच्यते। रूढियोगाभ्यामनुभयोपस्थितौ लक्ष्यलक्षणयोरुभयोरपि समलपः। यथा घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रि

प्रदीपः

७७ याणिभूतेभ्य इतीन्द्रियलक्षणसूत्रे गौतमीये। अथैषां लक्षणवाक्यानि त्रिधाश्लीलमित्यत्र त्रिधेति निरर्थकं। तस्य विभागमात्रार्थत्वेन लक्षणेऽनुपयोगा
दिति चेन्न। अश्लीलशब्दस्य व्रीडादिव्यंजकत्वेन यत्साधारणे कावयवशक्तिविरहेण नानार्थतया लक्षणाच्च यथार्थत्वमिति सम्यक् तदर्थत्वात्। तत्र
श्रुतिकटुत्वं श्रुतिदुःखजनकत्वं तच्च यद्यपि परुषवर्णेन नियतं न तथापि तज्जनकतावच्छेदकरूपवत्त्वं विवक्षितं तच्च परुषवर्णत्वं तच्च दुर्वचत्वं। उ
दाहरणं। अनङ्गमङ्गलगृहापाङ्गभङ्गितरङ्गितैः। आलिङ्गितः स तन्वङ्ग्या कार्तार्थ्यं लभते कदा। अत्र कार्तार्थ्यमिति पदं परुषवर्णमयं। किं
पुनरस्य दूषकताबीजं। उद्वेगजनकत्वमिति चेत्। न। किं तादृशेन ज्ञातेन तथा उत स्वरूपसत्त्वेन। नाद्यः। रसविशेषव्यंजकताज्ञाने
ऽपि प्रायिकतादृष्टपदश्रवणे नोद्वेगप्रसंगात्। न चेष्टापत्तिरनुभवविरोधात्। अन्त्ये तु संसादयः प्रमाणं। न ह्यविदितविशेषानपि तत्रै
व तदुद्वेजयति नान्यत्रेत्यत्र प्रमाणमस्ति। किं चैवं वैयाकरणादौ वक्तरि किञ्चित्त्वं यन्नो दोषाभावः। अत्रोच्यते। स्वाश्रयतेऽशब्दप्रयोगे कर्णो
पतापकशब्दप्रयोगेण श्रोतुरुद्वेगो रसापकर्षायेति स एव तद्बीजं। अत एव प्रतिकूलवर्णादस्य भेदः। तस्यैकर्णोपतापाहेतुतात्। अ शिवः ७७
=श्रोत्रेणापमेधिप्रमितादिरसदुताः।३=

तएव चानुकरणे वैयाकरणदौवक्तृविशेषान्निवारितोऽहो इतरस्मिंश्चगेपनीरसे च काव्ये स्मदोषताभावः। आद्येतस्यैवानुकरणीयतया स्वापत्यभावाद्द्वि
तीये च तत्स्वभावावगमेनोद्वेगाभावात्। तृतीये च श्रोतुस्तेनानुद्वेगात्। चतुर्थे तदनुगुणत्वेनोद्वेगाहेतुत्वात्। पंचमे मुख्यार्थहतेरभावात्। एवम
र्थे विषमकरणवशेनाप्यनुद्वेजकतया दोषताभावउपपद्यते। च्युतसंस्कृतिः च्युतास्खलिता संस्कृतिः संस्का रणं व्याकरणलक्षण
नुगमो यत्र पद्भाषासंस्कारकव्याकरणलक्षण [redacted] विरुद्धं पदं तत्भाषायां च्युतसंस्कृतीत्यर्थः। देश्यं तु न लक्षणविरुद्धं किं तु तद्विषय
:संज्ञाशब्दानां बहुलवचनेन संस्कृ [redacted] तत्वान्न तत्रातिव्याप्तिः। यथा। एतन्मंदविपक्वतिंदुकफलश्यामोदरापांडुरप्रांतं हंत पुलिंदसु
दरकरस्पर्शक्षमं लक्ष्यते। तत्पल्लीपतिपुत्रिकुंजरकुलं कुंभाभयाभ्यर्थनादीनं त्वामनुनाथते कुचयुगं पत्रांशुकं मा कृथाः। अत्र नाथ
त इतियाचत इत्यर्थे च्युतसंस्कृतिः सामान्यतः क्षिबादिसूत्रेण प्राप्तस्यात्मनेपदस्य नियामकेनाशिषि नाथ इति सूत्रेण शिक्षित
निषेधात्। तस्मान्नाथति स्तनयुगमिति पठनीयं। ननु नाथत इति स्वरूपं संस्कृतमेव तथा चार्थविशेषेन तथेति वक्तव्यं। एवं वा

प्रदीपः

७८

78

र्थदोषत्वं प्राप्तमिति। नैवं। यत्र शब्दपरिवर्त्तनेपि योदोषोनुवर्त्तते नस्यार्थदोषत्वं यत्तु तथा सति निवर्त्तते नस्य शब्ददोषत्वमिति विभागात्। अचार्थाप्र
मतीतिर्दूषकताबीजमिति नित्यदोषत्वं। अनुकरणे तदर्थपरत्वाभावाद्दोषत्वाभावः। अप्रयुक्तं। तथानुशासनसिद्धमपि कविभिर्न प्रयुक्तं। य
था। यथायं दारुणाचारः सर्वदैव विभाव्यते। तथा मन्ये दैवतोस्य पिशाचो राक्षसोथवा। अत्र दैवतानि पुंसि वेत्याम्नातोपि पुल्लिंगो दैव
तशब्दः कविभिर्न प्रयुक्तः। नन्वत्र किं दूषकताबीजं। न तावच्छक्तिविरहः। तत्सत्वात्। शक्तिस्मृतिविरहइत्यपि नास्ति। शब्दानुशा
सनेन तदूहे स्मृतेः प्रतिबंधकाभावादिति चेत्। पदार्थोपस्थितिविलंबस्तद्बीजं। अतएव श्लेषयमकादावदोषत्वं। उक्तं चालंकार
संप्रदायप्रतीत्यविलंबस्य तत्रानुद्देश्यत्वात्। वस्तुतस्तु तादृशकविसमयविलंघनप्रयोजनानुसंधानव्यग्रतया मुख्यार्थवि
च्छित्तिर्दूषकताबीजं। अतएवानुकरणे दोषत्वाभावः। यमकादावप्यदोषत्वं। अन्यत्राप्रयुज्यमानस्यापि तदर्थं कविभिः प्रयो शिवः
गस्यदर्शनेन व्यग्रतांदिति। असमर्थमित्यस्यार्थेन नञः। तेन यत्तदर्थपरिपठितमपि प्रकृतस्थले विवक्षितार्थसामर्थ्यरहितमि ७८

भावा१

स्यर्थः। समर्थस्यैव सामर्थ्यं विरुद्धमिति चेन्न। उपसंदानोपजीवित्वात्सामर्थ्यस्य। यथाहन्तेर्धातोः प्रकृतिजघनजंघादिषु पदादिपदोपसंदानेन नमा
र्गादिपदोपसंदानेन वावगतौ सामर्थ्येन पुनरविशिष्टस्य। यथा। तीर्थान्तरेषु स्नानेन समुपार्जितसत्कृतिः। सुरस्रोतस्विनीमेष हन्ति सं
प्रति सादरं। अस्यार्थानुपस्थितिरीषकताबीजमिति निलता। निहतार्थं। निहतः प्रसिद्धेनार्थेनाप्रसिद्धतया व्यवहितोऽर्थो यस्य तदुष्टं प्यर्थके चित्रयो
गान्नाप्रयुक्तसंकरः। उदाहरणं। यावकरसार्द्रपादप्रहारशोणितकचेन दयितेन। मुग्धा साध्वसतरला विलोकापरिचुंबिता सहसा। अत्र
शोणितपदं। अस्य रुधिरे प्रसिद्धिरप्रसिद्धिस्तु ज्वलीकृतत्वरूपे विवक्षितार्थे। इषकताबीजं प्रसिद्धस्यैव द्रागुपस्थित्या अप्रसिद्धविवक्षित स्य
स्य विलंबोपस्थितिरतोयमकादावदोषत्वं। तत्रोपस्थितिविलम्बस्यापि सहृदयसंमतत्वेनाविलंबानुद्देश्यतात्। अनुचितार्थो विवक्षितार्थति
रस्कारकोऽर्थो यस्य तत्। यथा। तपस्विभिर्या सुचिरेण लभ्यते प्रयत्नतः सत्रिभिरिष्यते च या। प्रयान्ति तामाशु गतिं यशस्विनो रणाश्वमे
धे पशुतामुपागताः। अत्र शौर्यप्रतिपाद्यपदांतरानपेक्षमेव पशुपदं कातरतामभिव्यनक्ति। तदर्थेन स्यादर्शनात्। विरुद्धमतिकृत्तुपदं

तरसापेक्षं तयेति तस्माद्देषः दूषकताबीजं चाविवक्षितनिरस्कारकार्थोपस्थितिः। अतोस्यनिरर्थदोषत्वं। निरर्थकं। अविवक्षितार्थकं वृत्तनिर्वाहमात्रप्रयो
जनकमितियावत्। अत एव वाक्यालंकारमात्रं यमकादिनिर्वाहकं च खल्वादि पदमदुष्टं। तच्च निपातरूपं चादिपदं तद्वचनादिति। उदाहरणं।
उत्फुल्लकमलकेसरपरागगौरद्युते मम हि गौरि। अभिवांछितं प्रसिध्यतु भगवति युष्मत्प्रसादेन। अत्र हि पदं। अर्थस्याविवक्षितत्वात् दू
षकताबीजं तस्य चिंत्यतां। तद्भिन्नतादर्थानुपस्थितिः। पदान्तरैरेव यावदभिधेयोपस्थापनात्। न चैवमवाचकादौ। तत्र तदभिधेय
स्य वाक्यार्थघटकपदस्य पदान्तरैरनुपस्थापनात्। नापि प्रतिकूलवर्णवद्रसविरोधिता। चादीनां सार्थकत्वस्यापि रसाविरोधि
त्वप्रसंगात्। स्वरूपस्य तादूप्यादिति। उच्यते। निरर्थकं प्रयुंजानस्य वचसि सहृदयानां वैमुख्यं दूषकताबीजं। प्रयोजनानुसंधान
व्यग्रता वा। अवाचकं। विवक्षितधर्मविशिष्टस्य विवक्षितधर्मिणः कापि न वाचकं पदं तदित्यर्थः। अत एवासमर्थाद्भेदः। तस्य क्वचि
च्छक्तिस्वीकारात्। एतादृशविशिष्टविरहश्च क्वचिद्धर्मिविशेषकावपि विवक्षितप्रकारे शक्तिविरहात्। क्वचिल्लक्षकारेशक्तावपि शिवः

धर्मिणि शक्तिविरहात्· क्वचित्प्रकारधर्मिणोरुभयोरपि शब्दस्याभावात्· तथा च द्विधा· अपेक्षितयोगमनपेक्षितयोगं च· तयोराद्यं यथा· अवं
ध्यकोपस्य विहंतुरापदो भवंति वश्याः स्वयमेव देहिनः। अमर्षशून्येन जनस्य जंतुना न जातहार्देन न विद्विषादरः।। अत्र पूर्वार्द्धे द्वि
ध्यरूपापद्विघातकतयादानत्वं विवक्षितमिति द्वितीयार्द्धेन तद्विपरीतप्रदर्शकं जंतुपदमप्रशस्तस्मिन्सुकृते न जन्मायत इति योगमपेक्ष्य
तस्य शक्तत्वेपि न विवक्षितयादानत्वं तथा प्रकारेण लेसवाचकं· अनपेक्षितयोगं यथा· ह्रादिक्लाकिल तामसी शशिमुखी ह श्यामया
मत्र सांत द्विक्लेषस्फूर्जोधकारितमिदं दग्धं दिनं कल्पितं· किं कुर्मः कुशलेस दैवविधुरे धातानचेत्तत्कथं तादृग्धाम वतीभवति मयो
मेनोजीवलोकेधुना· अत्र दिनपदं प्रकाशमयमित्यर्थे विवक्षितं नामसीसनेनलब्धस्तमोमयत्वस्यैव प्रतीतो भिधानायोपादाना
त्तत्र च धर्मिणि योगमनपेक्ष्यैव रूढ्या दिनत्वेन प्रकृतं न पुनः प्रकाशमयत्वेनेस वाचकं· द्वितीयं यथा· जलजे जलधरेक्षारमयं वर्ष
तिवारिद इदं हृद्भिनमश्चातो कुमानेषहेमते· अत्र जलधरशब्दस्य जलाधारकत्वे प्रकारे सामर्थ्येपि न समुद्रे धर्मिणि सामर्थ्यं

प्रदीपः
८०
80

यद्यपि योगशक्तिस्तत्राप्यस्त्येव तथापि रूढ्या प्रतिबंधादनस्तिकल्पैव· तृतीयं तूपसर्गसंसर्गादर्थांतरगतमन्यथा च· तयोराद्यं यथा·जंघाकां
डोरुनालो नखकिरणलसत्केसरालीकरालः प्रत्यग्रालक्तकाभाप्रसरकिसलयो मंजुमंजीरभृंगः। भर्तुर्नृत्तानुकारे जयति निज
तनुस्वच्छलावण्यवापीसंभूतांभोजशोभां विदधदभिनवो दंडपादो भवान्याः। अत्र विदधातिर्धारणे प्रयुक्तः न च धारणे धारण
त्वे वा समर्थः। विसंसर्गेण करणे निय [redacted] मितशक्तित्वात्· अंत्यस्तु वाक्यनिष्ठावाचकतायां प्राप्तभ्राडिसादावुदाहरिष्यते· तद्दे
वं निरूपणे प्रकाशेयदसमर्थे धर्मधर्मिणोरुभयोरपि शक्तिविरहः। अवाचके तु धर्ममात्रे सः। विरुपदिष्टुदाहरणं त्ववाचक
प्रकरणमध्येऽसमर्थस्यैवेति प्रलपितं तथा च वाचकत्वोदाहरणानवलोकननिबंधनं संदर्भविरुद्धं चेत्यनादेयं· दूषकतावी
जं तु विवक्षितार्थानुपस्थितिरिति निसएवायं· त्रिधाश्लीलमिति· अश्लीरस्यासीसर्थे सिधादित्वाल्लच्प्रत्ययः। कपिलकादित्वाद्
फस्य लत्वं· तथा च कांत्यभाववदिति पर्यवसन्नं· कांत्यभावश्चातिप्रसक्त इति श्रीडडुगुप्ताः। मंगलहेतुकस्तद्विशेषो वक्तव्यः। न

शिवः
८०

=अर्थान्तरस्येत्यस्मानंतरं निर्वाहित इति मृतः = निर्वाहित इति । अन्वयिनस्त्वर्थः ॥ २ =

चैतन्नत्रेयेः न तिप्रसक्तमनुगतं रूपमस्तीति व्रीडादिहेतुकाकांतिमत्तु नानापर्यायमश्लीलशब्द इत्यर्थः ॥ तत्र प्रत्येकं त्रिविधं क्वचिद्विवक्षितस्यैवार्थस्य व्रीडाद्यावल्लं
बनत्वात्क्वचिदविवक्षि[redacted]तार्थस्य निर्वाहितास्तथा तात्क्वचित्ता दृशार्थस्यानिर्वाहितोपि स्मृतिमात्रहेतुत्वात् ॥ ए
षु त्रिषु क्वचित्किंचिदुदाह्रियते । तत्र व्रीडाव्यक्तावर्थान्तरस्य तथा नावो यथा । साधनं सुमहद्यस्य यन्नान्यस्य विलोक्यते । तस्य धीशालिनः कोन्यः
सहेताराली तां भ्रुवं । अत्र सैन्यार्थकस्य साधनशब्दस्य पुंव्यंजनमर्थान्तरं जुगुप्साव्यक्तौ तथा भूतार्थस्मृतिहेतुत्वं यथा । लीलातामरसा
हतोन्यवनितानिःशंकदष्टाधरः कश्चित्केसरदूषितेक्षण इव व्यामील्य नेत्रे स्थितः ॥ मुग्धा कुड्मलितानने न ददती वायुं स्थिता तस्य सा
भ्रांत्या धूर्ततयाथवा नतिमृते तेनानिशं चुंबिता । अत्र वायुशब्दोपानवायुं स्मारयति न तु तदर्थतया वाक्यमुपपद्यते । अमंगलव्यक्तौ वि
वक्षितस्यैवार्थस्य न भावं यथा । मृदुपवनविभिन्नो मत्प्रियाया विनाशे घनरुचिरकलापो निःसपत्नोद्य जातः । रतिविगलितबंधे केशपाशे प्रि
यायाः सति कुसुमसनाथे कं हरेदेष बर्ही । अत्र विनाशशब्दस्य विवक्षित एवार्थोऽमंगलः ॥ एवं त्रिषु भिन्नभिन्नप्रकारोदाहरणे न प्रत्येकं त्रि

=अविशीतांनादिश्रयोगयोगित्वेसति भगवत्पादिसंबंधित्वंसमुन्नीतत्वंतत्वेसति कृष्यादिकार्यस्ययोगेनोपकल्याणकत्वंगुणत्वं॰ याम्यस्तुतिजनकैकदेशत्वंलक्षितत्वं॰ आलांडादीसादिनाबालकांडादिः।२= भयत्वतीकंपमपाऐ संबंधेनेतिपाठः।१=

प्रदीपः

त्वा२

प्रकारत्वमूहनीयंन्यायसाम्यात्॰ इष्टकताबीजंत्वनुभवसिद्धरसापकर्षकतादृशपदार्थोपस्थितिः।नीरसेतुचमत्कारापकर्षकत्वंनस्यात्।अथवाता

८९ दृशार्थोपस्थित्याश्रोतुर्वैमुख्यंनबीजंअतःशमकत्वायांदोषभावः।तादृशोपस्थितेःशमपोषकतात्॰ भाव्यमंगलत्वंचनेकामशास्त्रस्थितौचनदोष

4(त्वंवैमुख्याभावात्॰ शिवलिंगभगिनीश्लाघादिशब्देषुतुसमुन्नीतशुभलक्षितेषुअसभ्यार्थानुपस्थितेरनित्योयं॰ संदिग्धं॰ विवक्षिताबि

वक्षितोभयार्थोपस्थापनानुकूलस्वरूपद्धमसंदेहविषयः।यथा॰ आलिंगितस्तत्रभवान्संपराये जयश्रिया॰ आशीःपरंपरांवंद्यांकर्णेकृ

त्वाकृपांकुरु॰ अत्रवंद्यामितिपदंवंदीशब्देसमम्यंतंवंद्याशब्दे द्वितीयांतंवेतिसंदेहः।प्रथमेहठगृहीतमहिलायांकुर्विति द्वितीयेनमस्या क्षणं॰

माशीःपरंपरामित्यर्थोपपत्तौसाधकबाधप्रमाणाभावात्संशयः।इष्टकताबीजमुद्देश्यनिश्चयाभावः।अतोयत्रसंदेहएवोद्देश्यस्तत्र

